**मय्युत्पत्तिर्जगद्भर्तुर्भवितेति मदोद्धतः । शिशिरोऽथ ऋतून्सर्वान्दृश्यकुन्दरदोऽहसत् ॥ ४५ ॥**

अन्वयः–अथ मयि जगद्भर्तुः उत्पत्तिः भविता, इति मदोद्धतः शिशिरः दृश्य कुंद रदः सर्वान् ऋतून् अहसत्. ॥ ४५ ॥

अर्थः–हवे मारा समयमां आ लोकस्वामीनो जन्म थनारो छे, एम जाणीने जाणे हर्षघेलो थयेलो शिशिरऋतु मोगराना पुष्पोरूपी दांतो देखाडीने (जाणे) बीजी ऋतुओनी हांसी करवा लाग्यो. ॥ ४५ ॥

**प्रभुप्रभाब्धिरधुनाभ्येष्यतीतीव भक्तितः । विनीतैरुडुचन्द्रार्कैः प्रभाल्पत्वमतन्यत ॥ ४६ ॥**

अन्वयः–प्रभु प्रभाब्धिः अधुना अभ्येष्यति, इति भक्तितः इव विनीतैः उडु चंद्र अर्कैः प्रभा अल्पत्वं अतन्यत. ॥ ४६ ॥

अर्थः—प्रभुनी कांतिनो महासागर हमणा आवी पहोंचशे, एम जाणीने जाणे भक्तिथी विनयवंत एवा (पक्षे–दक्षिणायनमां छेटे

गयेला) तारा, चंद्र तथा सूर्य (पोतपोतानी) कांतिनुं स्वल्पपणुं विस्तारवा लाग्या. ॥ ४६ ॥

**अवतीर्णेषु तीर्थेशपादेषु पृथिवीतले । का श्रीरस्माकमित्यब्जैः पूर्वमेव व्यलीयत ॥ ४७ ॥**

अन्वयः-पृथिवी तले तीर्थेश पादेषु अवतीर्णेषु अस्माकं श्रीः का? इति अब्जैः पूर्वं एव व्यलीयत. ॥ ४७ ॥

अर्थः—(आ) पृथ्वीपीठपर तीर्थंकर प्रभुना चरणोनो अवतार थयाबाद अमारी शोभा शा विशातमां रहेशे? (जाणे) एम मानीने कमलो आगळथीज नष्ट थवा लाग्यां. ॥ ४७ ॥

**तदा मे का गतिर्लोकः पातार्हद्वाक्सुधां यदा । इति ध्यानादिव स्तम्भमम्भः प्राप हिमोद्गमे ॥ ४८ ॥**

अन्वयः-लोकः यदा अर्हत् वाक् सुधां पाता, तदा मे का गतिः? इति ध्यानात् इव हिमोद्गमे अंभः स्तंभं प्राप. ॥ ४८ ॥

अर्थः-लोको ज्यारे आ तीर्थंकरप्रभुनी वाणीरूपी अमृतने पीसे, त्यारे मारो प्रवाह शुं उपयोगी थवानो छे? एवा विचारथीज जाणे हिमालयपर जल (बरफरूपे) बंधावा मांड्युं. ॥ ४८ ॥

**जिनजन्मोत्सवे स्वर्गद्रुदलैस्तोरणस्रजम् । सुराः कर्तार इत्युर्व्यां शुचापाति तरुच्छदैः ॥ ४९ ॥**

अन्वयः-जिन जन्म उत्सवे सुराः स्वर्गद्रु दलैः तोरण स्रजं कर्तारः, इति शुचा तरु च्छदैः उर्व्यां अपाति. ॥ ४९ ॥

अर्थः-आ जिनेश्वरप्रभुना जन्म महोत्सव समये देवो तो कल्पवृक्षोनां पांदडांओवडे तोरणमाळाओ करवाना छे, (जाणे) एवी दिलगिरिथी वृक्षोनां पत्रो जमीनपर पडवा लाग्यां. ॥ ४९ ॥

क्रियमाणासु रक्षासु देव्या वृद्धाङ्गनाजनैः । नव मासा व्यतिक्रान्ताः सार्धाष्टमदिनास्तदा ॥ ५० ॥

अन्वयः–वृद्ध अंगना जनैः देव्याः रक्षासु क्रियमाणासु तदा सार्ध अष्टम दिनाः नव मासाः व्यतिक्रांताः. ॥ ५० ॥

अर्थः–वृद्ध स्त्रीओ ते जयामहाराणीनी शुश्रूषा करते छते, ते वखते साडासात दिवस अधिक नव महिना व्यतीत थया. ॥५०॥

अथ कृष्णचतुर्दश्यां निशीथे मासि फाल्गुने । चन्द्रे शतभिषग्वर्तिन्यूरुस्थमहिषध्वजम् ॥ ५१ ॥

असूत नूतनाम्भोजप्रभं भुवनभूषणम् । रत्नं रोहणभूमीव जयादेवी जिनाधिपम् ॥ ५२ ॥ युग्मम् ॥

अन्वयः–अथ फाल्गुने मासि कृष्ण चतुर्दश्यां निशीथे चंद्रे शतभिषग् वर्तिनि, रोहणभूमी रत्नं इव, जयादेवी ऊरुस्थ महिष ध्वजं, नूतन अंभोज प्रभं, भुवन भूषणं जिन अधिपं असूत. ॥ ५१ ॥ ५२ ॥ युग्मं ॥

अर्थः–पछी फागण मासनी कृष्णचतुर्दशीने दिवसे मध्यरात्रिए, चंद्रनो योग शतभिषक् नक्षत्रसाथे थये छते रोहणाचलनी भूमि जेम रत्नने उत्पन्न करे, तेम ते जयाराणीए साथळमां रहेला महिषना चिन्हवाळा, नवीन कमलसरखी (लाल) कांतिवाळा, तथा जगतने आभूषणसरखा, एवा श्रीजिनेश्वर प्रभुने जन्म आप्यो. ॥ ५१ ॥ ५२ ॥ युग्मं ॥

तदा कोऽपि प्रकाशोऽभूदपि दुर्गतिभूमिषु । निखिलानां सुखं जज्ञे नारकाणामपि क्षणम् ॥ ५३ ॥

अन्वयः—तदा दुर्गति भूमिषु अपि कः अपि प्रकाशः अभूत्, निखिलानां नारकाणां अपि क्षणं सुखं जज्ञे. ॥ ५३ ॥

अर्थ–वळी ते वखते नरकभूमिओमां पण कोइक आश्चर्यकारक प्रकाश थयो, तथा सघळा नारकीओने पण क्षणवार सुधी सुख

थयुं. ॥ ५३ ॥

अस्माकमयमीशोऽभूदशेषगुणसागरः । इत्यानन्दवशेनेव दिशः प्रापुः प्रसन्नताम् ॥ ५४ ॥

अन्वयः—अशेष गुण सागरः अयं अस्माकं ईशः अभूत्, इति आनंद वशेन इव दिशः प्रसन्नतां प्रापुः ॥ ५४ ॥

अर्थः–सर्व गुणोना महासागर सरखा, एवा आ अमारा स्वामी जन्म्या छे, एवीरीतना आनदने लीधे जाणे होय नही! तेम सर्व दिशाओ प्रसन्नपणाने प्राप्त थइ. ॥ ५४ ॥

ववुः प्रदक्षिणावर्ताः कुसुमश्रीविमिश्रिताः । तन्वन्त इव सद्भक्तिं जगत्प्राणा जगत्प्रभोः ॥ ५५ ॥

अन्वयः–जगत्प्रभोः सद्भक्तिं तन्वंतः इव, प्रदक्षिणावर्ताः, कुसुम श्री विमिश्रिताः जगत्प्राणाः ववुः. ॥ ५५ ॥

अर्थः—( वळी ) जाणे जगतना स्वामी एवा ते श्रीतीर्थंकरप्रभुनी उत्तम भक्ति विस्तारता होय नही! तेम पुष्पोनी ( सुगंधिरूपी ) लक्ष्मीथी मिश्रित थयेला दक्षिणावर्त वायु वावा लाग्या. ॥ ५५ ॥

आख्यातुमिव विश्वेषु प्रभोर्जन्ममहोत्सवम् । घनगम्भीरनिर्घोषा नेदुर्दुन्दुभयोऽम्बरे ॥ ५६ ॥

अन्वयः–विश्वेषु प्रभोः जन्म महोत्सवं आख्यातुं इव, घन गंभीर निर्घोषाः दुंदुभयः अंबरे नेदुः. ॥ ५६ ॥

अर्थः–जगतमां प्रभुना जन्ममहोत्सवने जाणे जाहेर करवा माटे होय नही! तेम मेघगर्जना सरखा गंभीर नादवाळी दुंदुभिओ आकाशमां वागवा लागी. ॥ ५६ ॥

प्रभुपादाम्बुजस्पर्शपवित्रं पृथिवीतलम् । पूजयद्भिरिवामर्त्यैश्चक्रिरे पुष्पवृष्टयः ॥ ५७ ॥

अन्वयः—प्रभु पाद अंबुज स्पर्श पवित्रं पृथिवी तलं पूजयद्भिः इव अमर्त्यैः पुष्प वृष्टयः चक्रिरे. ॥ ५७ ॥

अर्थः–प्रभुना चरणकमलोना स्पर्शथी पवित्र थयेलां पृथ्वीतलने जाणे पूजता होय नही! एवा देवोए त्यां पुष्पोनी वृष्टिओ करी.

मत्वासनप्रकम्पेनावधिज्ञानात्प्रभोर्जनिम् । अष्टाजग्मुरधोलोकवासिन्यो दिक्कुमारिकाः ॥ ५८ ॥

अन्वयः—आसन प्रकंपेन अवधि ज्ञानात् प्रभोः जनिं मत्वा अधोलोक वासिन्यः अष्ट दिक् कुमारिकाः आजग्मुः. ॥ ५८ ॥

अर्थः—आसन कंपवाथी अवधिज्ञानवडे प्रभुनो जन्म थयेलो जाणीने अधोलोकमां वसनारी आठ दिक्कुमारीओ आवी. ॥५८॥

भोगंकरा भोगवती सुभोगा भोगमालिनी । तोयधारा विचित्रा च पुष्पमाला त्वनिन्दिता ॥ ५९ ॥

गत्वा स्तुत्वा न भेतव्यमित्युदीर्य च ता इमाः । जिनजन्मोत्सवं देव्यै स्वागतौ हेतुमभ्यधुः ॥६०॥

अन्वयः—भोगंकरा, भोगवती, सुभोगा, भोगमालिनी, तोयधारा च विचित्रा, पुष्पमाला तु अनिंदिता, ॥ ५९ ॥ च ताः इमाः देव्यै नत्वा च स्तुत्वा, न भेतव्यं इति उदीर्य जिन जन्म उत्सवं स्व आगतौ, हेतुं अभ्यधुः. ॥ ६० ॥ युग्मं ॥

अर्थः—भोगंकरा, भोगवती, सुभोगा, भोगमालिनी, तोयधारा, विचित्रा, पुष्पमाला, अने आनंदिता, ॥ ५९ ॥ एवी ते आठे दिक्कुमारिकाओ जयादेवीने नमीने, तथा तेनी स्तुति करीने, अने तमारे डरवुं नही, एम कहीने, प्रभुनो जन्ममहोत्सव करवा-माटे अमारुं अहीं आगमन थयुं छे, एरीतनो पोतानो आववानो हेतु कही संभळाववा लागी. ॥ ६० ॥ युग्मं ॥

सहस्रस्तम्भमातेनुरैशान्यां प्राङ्मुखं दिशि । ताः सूतिसदनं वातपूतयोजनभूतलम् ॥ ६१ ॥

अन्वयः–ताः ऐशान्यां दिशि सहस्र स्तंभं, प्राङ्मुखं, वात पूत योजन भूतलं सूति सदनं आतेनुः ॥ ६१ ॥

अर्थः–तेओए ईशानखुणामां, एकहजार स्तंभोवाळुं, पूर्व दिशातरफना सन्मुख द्वारवाळुं, तथा वायुथी पवित्र थयेला एक जोजनना पृथ्वीतलवाळुं सूतिकाघर बनाव्युं. ॥ ६१ ॥

देवि त्वमेव धन्यासि यस्याः सूनुर्जगद्गुरुः । इत्यादिगीतगायिन्यस्ताः प्रभोः परितः स्थिताः ॥ ६२ ॥

अन्वयः–(हे) देवि! त्वं एव धन्या असि, यस्याः सूनुः जगद्गुरुः, इत्यादि गीत गायिन्यः ताः प्रभोः परितः स्थिताः. ॥६२॥

अर्थः—हे माताजी! तमोनेज धन्य छे, के जेना पुत्र त्रणे जगतना स्वामी छे, इत्यादिक गीतो गाती थकी तेओ प्रभुनी आसपास बेसी गइ. ॥ ६२ ॥

पीठकम्पात्प्रभोर्जन्म मत्वा मेरुनिकेतनाः । मुदिता दिक्कुमार्योऽष्टावूर्ध्वलोकादिहाययुः ॥ ६३ ॥

अन्वयः–पीठ कंपात् प्रभोः जन्म मत्वा, मेरु निकेतनाः, मुदिताः अष्टौ दिक्कुमार्यः ऊर्ध्व लोकात् इह आययुः. ॥ ६३ ॥

अर्थः–(वळी) आसन कंपवाथी प्रभुनो जन्म थयेलो जाणीने, मेरुपर्वतमां छे स्थान जेमनां, एवी हर्ष पामेली आठ दिक्कुमारीओ ऊर्ध्वलोकमांथी त्यां आवी. ॥ ६३ ॥

मेघंकरा मेघवती सुमेघा मेघमालिनी । सुवत्सा वत्समित्रा च वारिषेणा बलाहका ॥ ६४ ॥

**इमा जिनं च देवीं च नत्वा योजनसंमिताम् । धरां गन्धोदकैः सिक्त्वा पुष्पवृष्टिं वितेनिरे ॥ ६५ ॥**

अन्वयः—मेघंकरा, मेघवती, सुमेघा, मेघमालिनी, सुवत्सा च वत्समित्रा, वारिषेणा, बलाहका ॥ ६४ ॥ इमाः जिनं च देवीं च नत्वा योजन संमितां धरां गंध उदकैः सिक्त्वा पुष्पवृष्टिं वितेनिरे. ॥ ६५ ॥ युग्मं ॥

अर्थः—मेघंकरा, मेघवती, सुमेघा, मेघमालिनी सुवत्सा, वत्समित्रा, वारिषेणा, अने बलाहका, ॥ ६४ ॥ ए नामनी ते आठे दिक्कुमारीओ जिनेश्वरप्रभुने तथा तेमनी माताने नमीने एक जोजनना विस्तारवाळी भूमिपर सुगंधि जलनो छटकाव करीने, तेपर पुष्पवृष्टि करवा लागी. ॥ ६५ ॥ युग्मं ॥

**ईयुरासनकम्पेन ज्ञात्वा जन्म जिनस्य तत् । पौरस्त्यरुचकादष्टौ दिक्कुमार्यः सदर्पणाः ॥ ६६ ॥**

अन्वयः—आसन कंपेन जिनस्य तत् जन्म ज्ञात्वा पौरस्त्य रुचकात् सदर्पणाः अष्टौ दिक्कुमार्यः ईयुः. ॥ ६६ ॥

अर्थः—(वळी) पोतानां आसनो कंपवाथी जिनेश्वरप्रभुनो ते जन्म थयेलो जाणीने पूर्वतरफना रुचकद्वीपथी दर्पण सहित आठ दिक्कुमारीओ आवी. ॥ ६६ ॥

**ताश्च नन्दोत्तरानन्दे आनन्दानन्दवर्धने । विजया वैजयन्ती च जयन्ती चापराजिता ॥ ६७ ॥**

अन्वयः—ताः च नंदा, उत्तरानंदे, आनंदा, आनंदवर्धने, विजया, वैजयंती जयंती च अपराजिता. ॥ ६७ ॥

अर्थः—वळी तेओ नंदा उत्तरानंदा, आनंदा, आनंदवर्धना, विजया, वैजयंती जयंती अने अपराजिता नामनी हती. ॥ ६७ ॥

**एताः प्राच्यां दिशि स्थित्वा नत्वा मातृयुतं जिनम् । जगुर्जगन्मनोज्ञानि गीतानि प्रीतचेतसः ॥६८॥**

अन्वयः-एताः प्राच्यां दिशि स्थित्वा, मातृयुतं जिनं नत्वा प्रीत चेतसः जगत् मनोज्ञानि गीतानि जगुः. ॥ ६८ ॥

अर्थः-ते आठे दिक्कुमारीओ पूर्व दिशामां रहीने, मातासहित जिनेश्वरप्रभुने नमस्कार करीने, आनंदित मनवाळी थइथकी जगतने मनोहर लागे, एवां गीतो गावा लागी. ॥ ६८ ॥

**अपाच्यरुचकात्पीठप्रकम्पेनाययुस्ततः । दिक्कन्या अष्टभृङ्गारशृङ्गारितकराम्बुजाः ॥ ६९ ॥**

**समाहारा सुप्रदत्ता सुप्रबुद्धा यशोधरा । लक्ष्मीवती शेषवती चित्रगुप्ता वसुंधरा ॥ ७० ॥ युग्मम् ॥**

अन्वयः—ततः पीठ प्रकंपेन अपाच्य रुचकात् भृंगार शृंगारित कर अंबुजाः अष्ट दिक्कन्याः आययुः ॥ ६९ ॥ समाहारा, सुप्रदत्ता, सुप्रबुद्धा, यशोधरा, लक्ष्मीवती, शेषवती, चित्रगुप्ता, वसुंधरा ॥ ७० ॥ युग्मं ॥

अर्थः—पछी आसन कंपवाथी दक्षिण रुचकथी, झारीओवडे शोभिता छे हस्तकमलो जेओना, एवी आठ दिक्कुमारिकाओ आवी, ॥ ६९ ॥ तथा (तेओनां) समाहारा, सुप्रदत्ता, सुप्रबुद्धा, यशोधरा, लक्ष्मीवती, शेषवती, चित्रगुप्ता, अने वसुंधरा नामो हतां.॥७०॥

**एताः प्रणम्य तीर्थेशं तीर्थेशजननीमपि । स्फीतगीतकलादक्षा दक्षिणस्यां दिशि स्थिताः ॥ ७१ ॥**

अन्वयः-एताः तीर्थेशं, तीर्थेश जननीं अपि प्रणम्य स्फीत गीत कला दक्षाः दक्षिणस्यां दिशि स्थिताः ॥ ७१ ॥

अर्थः—तेओ तीर्थंकरप्रभुने तथा तीर्थंकरप्रभुनी माताने पण नमीने मनोहर गीतो गावानी कलामां कुशल थइ थकी दक्षिण

दिशामां बेठी. ॥ ७१ ॥

**प्रतीच्यरुचकादष्टौ दिक्कन्याः पीठकम्पतः । आययुर्व्यजनाभोगभ्राजिष्णुकरपङ्कजाः ॥ ७२ ॥**

अन्वयः—पीठ कंपतः प्रतीच्य रुचकात् अष्टौ दिक्कन्याः व्यजन आभोग भ्राजिष्णु करपंकजाः आययुः. ॥ ७२ ॥

अर्थः—(पछी) आसनो कंपवाथी पश्चिम रुचकथी आठ दिक्कुमारीओ पंखाओ धारण करवाथी शोभिता हस्तकमलोवाळी थइ थकी ( त्यां ) आवी. ॥ ७२ ॥

**इलादेवी सुरादेवी पृथिवी पद्मवत्यपि । एकनासा नवमिका भद्रा शीतेति नामतः ॥ ७३ ॥**

अन्वयः—इलादेवी, सुरादेवी, पद्मवती, अपि, एकनासा, नवमिका, भद्रा, शीता इति नामतः ॥ ७३ ॥

अर्थः—(तेओनां) इलादेवी, सुरादेवी, पद्मवती, एकनासा, नवमिका, भद्रा तथा शीता, एवां नामो हतां. ॥ ७३ ॥

**जननीसहितं नत्वा त्रैलोक्यमहितं जिनम् । पश्चिमायां दिशि प्रीता गीतामृतमुचः स्थिताः ॥ ७४ ॥**

अन्वयः—जननी सहितं त्रैलोक्यमहितं जिनं नत्वा, प्रीताः गीत अमृतमुचः पश्चिमायां दिशि स्थिताः ॥ ७४ ॥

अर्थः—मातासहित, त्रणे लोकोथी पूजाता एवा श्रीजिनेश्वरप्रभुने नमस्कार करीने, आनंदित थइथकी गीतोरूपी अमृतने वरसावतीथकी (तेओ) पश्चिमदिशामां बेठी. ॥ ७४ ॥

**उदीच्यरुचकादष्ट विष्टरस्य प्रकम्पतः । दिक्कुमार्यः समाजग्मुश्चञ्चच्चामरचारवः ॥ ७५ ॥**

अन्वयः–विष्टरस्य प्रकंपतः उदीच्य रुचकात् अष्ट दिक्कुमार्यः चंचत् चामर चारवः समाजग्मुः. ॥ ७५ ॥

अर्थः–आसन कंपवाथी उत्तर रुचकथी आठ दिक्कुमारीओ (हाथमां) मनोहर चामरो धारण करती थकी त्यां आवी. ॥७५॥

**अलम्बुसा सुकेशी च पुण्डरीका च वारुणी । हासा सर्वप्रभा चैव श्रीर्ह्रीरित्यभिधानतः ॥ ७६ ॥**

अन्वयः—अलंबुसा, च सुकेशी, च पुन्डरीका, वारुणी, हासा, सर्वप्रभा, च एव श्रीः, ह्रीः, इति अभिधानतः ॥ ७६ ॥

अर्थः—अलंबुसा, तथा सुकेशी, तथा पुन्डरीका, वारुणी, हासा, सर्वप्रभा, तथा श्री, अने ह्री, एवां तेओनां नामो हतां. ॥७६॥

**नत्वा माता समं मात्राधिकभक्तिभराः प्रभुम् । तास्तस्थुरुत्तराशायामुत्तरोदारगीतयः ॥ ७७ ॥**

अन्वयः–मात्रा अधिक भक्तिभराः ताः माता समं प्रभुं नत्वा उत्तर उदार गीतयः उत्तर आशायां तस्थुः. ॥ ७७ ॥

अर्थः—अत्यंत भक्तिना समूहवाळी ते दिक्कन्याओ मातासहित प्रभुने नमस्कार करीने मनोहर विशाल गीतो गातीथकी उत्तर-दिशामां बेठी. ॥ ७७ ॥

**ईयुश्चतस्रो दिक्कन्या विदिग्भ्यः पीठकम्पतः । सुतारा चित्रकनका चित्रा सौत्रामणी तथा ॥ ७८ ॥**

अन्वयः—पीठकंपतः सुतारा, चित्रकनका, चित्रा, तथा सौत्रामणी, चतस्रः दिक्कन्याः विदिग्भ्यः ईयुः. ॥ ७८ ॥

अर्थः—आसन कंपवाथी सुतारा, चित्रकनका, चित्रा, तथा सौत्रामणीनामनी चार दिक्कुमारीओ विदिशाओमांथी त्यां आवी.

**दीप्रदीपकरा नत्वा स्वामिनं स्वामिनीमपि । गीतामृतभृतस्तस्थुरैशान्यादिविदिक्षु ताः ॥ ७९ ॥**

अन्वयः—ताः स्वामिनं, स्वामिनीं अपि नत्वा दीप्र दीप कराः गीत अमृत भृतः ऐशान्यादिषु विदिक्षु तस्थुः. ॥ ७९ ॥

अर्थः—तेओ प्रभुने तथा तेमनी माताने पण नमीने, तथा हाथमां झगटेला दीपको राखीने, गीतोरूपी अमृतने वरसावती थकी ईशान आदिक चारे विदिशाओमां बेठी. ॥ ७९ ॥

**दिक्कन्या मध्यरुचकाच्चतस्रः पीठकम्पतः । रूपा रूपासिका चेयु सुरूपा रूपवत्यपि ८० ॥**

अन्वयः—पीठकंपतः मध्यरुचकात् रूपा, रूपासिका, च सुरूपा, रूपवती अपि चतस्रः दिक्कन्याः मध्यरुचकात् ईयुः. ॥८०॥

अर्थः—(वळी) आसन कंपवाथी मध्यरुचकथी रूपा, रूपासिका, तथा सुरूपा अने रूपवती नामनी चार दिक्कमारीओ मध्यरुचकथी (त्यां) आवी. ॥ ८० ॥

**नालं बालस्य ताश्छित्वा चतुरङ्गुलवर्जितम् । रत्नयुक्तं निखन्योर्व्यामत्र दूर्वामरोपयन् ॥ ८१ ॥**

अन्वयः—ताः बालस्य चतुरंगुल वर्जितं बालस्य नालं छित्वा, रत्नयुक्तं उर्व्यां निखन्य, अत्र दूर्वां अरोपयन्. ॥ ८१ ॥

अर्थः–तेओए ते बालप्रभुनी चार आंगुल शिवायनी (बाकीनी) नाल छेदीने रत्नोसहित जमीनमां दाटी, तथा तेपर दूर्वाने रोपी.

**त्रीन्मूलसौधतः पूर्वदक्षिणोत्तरदिक्षु ताः । रम्भागृहांश्चतुःशालसिंहासनजुषो व्यधुः ॥ ८२ ॥**

अन्वयः–मूल सौधतः पूर्व दक्षिण उत्तर दिक्षु चतुःशालसिंहासनजुषः त्रीन् रंभागृहान् ताः व्यधुः. ॥ ८२ ॥

अर्थः—मूलघरथी पूर्व, दक्षिण तथा उत्तर दिशामां चोकट तथा सिंहासनोवाळा त्रण केळनां घरो तेओए बनाव्यां. ॥ ८२ ॥

ता दक्षिणचतुःशालपीठे देव्या जिनस्य च । अभ्यङ्गोद्वर्तनैर्दिव्यैस्तैलोद्वर्तनकैर्व्यधुः ॥ ८३ ॥

अन्वयः—दक्षिण चतुःशाल पीठे ताः देव्याः च जिनस्य दिव्यैः तैल उद्वर्तनकैः अभ्यंग उद्वर्तने व्यधुः. ॥ ८३ ॥

अर्थः—(पछी) दक्षिणतरफनी चोकटना सिंहासनपर (बेसाडीने) तेओए प्रभुनी माताना तथा प्रभुना (शरीरपर) दिव्य तेल तथा पीठीवडे मर्दन अने उद्वर्तन कर्यां. ॥ ८३ ॥

उभौ संस्नप्य संमार्ज्य प्राक्चतुःशालविष्टरे । ता दिव्यचन्दनैर्लिप्त्वाभूषयंश्चेलभूषणैः ॥ ८४ ॥

अन्वयः—प्राक् चतुःशाल विष्टरे ताः उभौ संस्नप्य, संमार्ज्य दिव्य चंदनैः लिप्त्वा चेल भूषणैः अभूषयन्, ॥ ८४ ॥

अर्थः—(पछी) पूर्वतरफनी चोकटना सिंहासनपर तेओए ते बन्नेने (बेसाडीने) स्नान करावीने, तथा संमार्जन करीने, अने दिव्य चंदनवडे विलेपन करीने, तेमने वस्त्रोवडे तथा आभूषणोवडे शणगार्यां. ॥ ८४ ॥

एत्योत्तरचतुःशाले मथितारणिवह्निना । हृतैः क्षुद्रहिमाद्रेस्ता द्रुतैर्गोशीर्षचन्दनैः ॥ ८५ ॥

तयोः शान्तिकमाधाय भद्रपीठप्रतिष्ठयोः । व्यक्तभक्तिविधौ दक्षा रक्षापोट्टलिकां व्यधुः ॥८६॥युग्मम्॥

अन्वयः—उत्तर चतु शाले एत्य मथित अरणि वह्निना द्रुतैः क्षुद्र हिमाद्रेः हृतैः गोशीर्ष चंदनैः, ॥ ८५ ॥ व्यक्त भक्ति विधौ दक्षाः ताः भद्रपीठ प्रतिष्ठयोः तयोः शांतिकं आधाय रक्षा पोट्टलिकां व्यधुः. ॥ ८६ ॥ युग्मं ॥

अर्थः—( पछी ) उत्तर तरफनी चोकटपर आवीने, अरणिना बे काष्टोने परस्पर घसवाथी प्रकटावेला अग्निवडे, क्षुद्र हिमवंत

पर्वतमांथी लावेलां गोशीर्षचंदनने सळगावीने, ॥ ८५ ॥ प्रगट रीते भक्ति करवामां चतुर एवी ते दिक्कुमारीओए सिंहासनपर बेसाडेला एवा प्रभु तथा तेमनी मातामाटे शांतिकार्य करीने, तेओने रक्षापोटलीओ बांधी. ॥ ८६ ॥ युग्मं ॥

**पर्वतायुर्भवेत्युक्त्वा कर्णाभ्यर्णे प्रभोः स्थिताः । आस्फालयांबभूवुस्ता हस्ताभ्यां ग्रावगोलकौ ॥ ८७ ॥**

अन्वयः–पर्वतायुः भव ? इति उक्त्वा प्रभोः कर्ण अभ्यर्णे स्थिताः ताः हस्ताभ्यां ग्राव गोलकौ आस्फालयां बभूवुः ॥ ८७ ॥

अर्थः–( हे प्रभु! ) तमो पर्वतसरखा आयुवाळा थाओ? एम कहीने, प्रभुना कर्णपासे उभीने तेओए ( पोताना ) बन्ने हाथवडे पत्थरना बे गोळाओ फोड्या. ॥ ८७ ॥

**सूतिधाम्नि जिनेन्द्रं च जिनेन्द्रजननीं च ताः । आनीयाधाय शय्यायां गायन्त्यः परितः स्थिताः ॥८८॥**

अन्वयः—च जिनेंद्रं च जननीं ताः सूति धाम्नि आनीय शय्यायां आधाय गायंत्यः परितः स्थिताः. ॥ ८८ ॥

अर्थः—पछी जिनेश्वरप्रभुने तथा तेमनी माताने तेओ सूतिकाघरमां लावीने, तथा शय्यामां सूवाडीने आसपास गीतो गाती थकी बेठी

**समं द्युषु तदा नित्यघण्टानामजनि ध्वनिः । विश्वप्रबोधनाटथैकनान्दीतूर्यरवोपमः ॥ ८९ ॥**

अन्वयः—तदा द्युषु विश्व प्रबोध नाट्य एक नांदी तूर्य रव उपमः नित्य घंटानां ध्वनिः समं अजनि. ॥ ८९ ॥

अर्थः—ते वखते देवलोकोमां जगतने जणाववारूप नाटकना एक नांदीपाठना वाजित्रना नादसरखो शाश्वता घंटाओनो एकीहारे अवाज थवा मांड्यो. ॥ ८९ ॥

आसनान्यचलन्नद्रिनिबिडानि बिडौजसाम् । व्याख्यान्तीव शिरःकम्पैर्जिनजन्माद्‌भुतां भुवम् ॥ ९० ॥

अन्वयः–शिरः कंपैः जिन जन्म अद्‌भुतां भुवं व्याख्यांति इव बिडौजसां अद्रि निबिडानि आसनानि अचलन्. ॥ ९० ॥

अर्थः–वळी ते वखते मस्तकना कंपवाथी प्रभुना जन्मथी आश्चर्ययुक्त थयेली पृथ्वीने जाणे जाहेर करतां होय नही! तेम पर्वत-सरखां निश्चल इंद्रोनां आसनो कंपवा लाग्यां. ॥ ९० ॥

अथैवं दर्शयत्योजः को मयीति क्रुधोत्कटम् । आत्तवज्रं सुधर्मेशं नत्वा सेनापतिर्जगौ ॥ ९१ ॥

अन्वयः–अथ एवं मयि कः ओजः दर्शयति? इति क्रोध उत्कटं आत्तवज्रं सुधर्मेशं नत्वा सेनापतिः जगौ. ॥ ९१ ॥

अर्थः—पछी आवीरीते मारीसामे कोण पराक्रम बतावे छे? एम विचारी क्रोधातुर थयेला, तथा उपाडेल छे वज्र जेणे, एवा सौधर्मेन्द्रने सेनापतिए नमीने कह्युं के, ॥ ९१ ॥

वज्रं विश्राम्यतु स्वामिन्वद कं हन्मि ते द्विषम् । इत्यस्य वाग्भिरुद्‌भूतसमाधिरवधीक्षणात् ॥ ९२ ॥
परिज्ञाय प्रभोर्जन्म विलीनक्रोधबन्धनः । द्राग्मिथ्यादुःकृतं कृत्वामुञ्चत्सिंहासनं हरिः ॥९३॥ युग्मम् ॥

अन्वयः–(हे) स्वामिन्! वज्रं विश्राम्यतु? वद? ते कं द्विषं हन्मि? इति अस्य वाग्भिः, अवधि ईक्षणात् उद्‌भूत समाधिः, ॥ ९२ ॥ प्रभोः जन्म परिज्ञाय विलीन क्रोध बंधनः हरिः द्राग् मिथ्या दुःकृतं कृत्वा सिंहासनं अमुंचत्. ॥ ९३ ॥ युग्मं ॥

अर्थः—हे स्वामी! वज्रने विसामो आपो? अने कहो के, आपना कया शत्रुने हुं मारुं? एवीरीतनी तेनी वाणीथी, तथा अवधिज्ञानवडे जोवाथी, थयेल छे शांति जेने, ॥ ९२ ॥ एवा इंद्रे प्रभुनो जन्म थयेलो जाणीने, क्रोधने तजी तुरत मिथ्यादुष्कृत देइ (पोतानुं) सिंहासन तजी दीधुं. ॥ ९३ ॥ युग्मं ॥

**दत्वा पदानि सप्ताष्टौ प्रभुजन्मदिशं प्रति । नत्वा स्तुत्वा जिनं शक्रोऽलंचक्रे विष्टरं पुनः ॥ ९४ ॥**

अन्वयः–शक्रः प्रभु जन्म दिशि सप्त अष्ट पदानि दत्वा, जिनं नत्वा, स्तुत्वा पुनः विष्टरं अलंचक्रे. ॥ ९४ ॥

अर्थः—(पछी) ते सौधर्मेंद्र प्रभुना जन्मनी दिशातरफ सात आठ पगलां जइने, तथा प्रभुने नमीने, अने तेमनी स्तुति करीने पाछो ते पोताना सिंहासनपर बेठो. ॥ ९४ ॥

**अथाहूय स सेनान्यं नैगमेषिणमादिशत् । जिनजन्मोत्सवं कर्तुमाकारय सुरानिति ॥ ९५ ॥**

अन्वयः–अथ सः नैगमेषिणं सेनान्यं आहूय इति आदिशत्, जिन जन्म उत्सवं कर्तुं सुरान् आकारय? ॥ ९५ ॥

अर्थः—पछी तेणे (पोताना) नैगमेषीनामना सेनापतिने बोलावीने एवी आज्ञा करी के, जिनेश्वर प्रभुनो जन्म महोत्सव करवामाटे तुं देवोने बोलाव? ॥ ९५ ॥

**योजनप्रमितां घण्टां सुघोषेत्यभिधानतः । अवादयदयं प्रोच्चैर्वारांस्त्रीन्विपुलस्वरम् ॥ ९६ ॥**

अन्वयः–अयं सुघोषा इत्यभिधानतः योजन प्रमितां घंटां विपुल स्वरं त्रीन् वारान् प्रोच्चैः अवादयत्. ॥ ९६ ॥

अर्थः—पछी ते नैगमेषी देवे सुघोषानामनो एक योजनना प्रमाणवाळो घंट विस्तीर्ण नादसहित त्रण वखत घणा जोरथी वगाडयो.

**एतद्ध्वानादथैकोनद्वात्रिंशल्लक्षसंख्यया । विमानेषु प्रतिध्वाना घण्टानां सर्वतोऽभवन् ॥ १७ ॥**

अन्वयः–अथ एतत् ध्वानात् एकोन द्वात्रिंशत् लक्ष संख्यया विमानेषु सर्वतः घंटानां प्रतिध्वानाः अभवन्. ॥ १७ ॥

अर्थः—पछी ते घंटना नादथी बत्रीस लाखमां एक ओछा विमानोमां चोतरफथी घंटोना प्रतिध्वनिओ प्रगट थया. ॥ १७ ॥

**क्रीडासक्तास्ततः सर्वे सावधानाः सुराः स्थिताः । घण्टानादे च विश्रान्ते सेनानीरिति घुष्टवान् ॥१८॥**

अन्वयः–ततः क्रीडा आसक्ताः सर्वे सुराः सावधानाः स्थिताः, च घंटानादे विश्रांते सेनानीः इति घुष्टवान्. ॥ १८ ॥

अर्थः—ते घंटोना नादथी क्रीडामां लयलीन थयेला सघळा देवो सावधान थया. तथा (पछी) ते घंटोनो नाद बंध पड्याबाद ते सेनापतिदेवे आवी रीतनी उद्घोषणा करी के, ॥ १८ ॥

**अमरा भारते क्षेत्रे जिनजन्मोत्सवे हरिः । गन्ता ततः प्रियायुक्ता एत त्वरितमेत भोः ॥ १९ ॥**

अन्वयः–भोः अमराः ! भारते क्षेत्रे जिन जन्म उत्सवे हरिः गंता, ततः प्रियायुक्ताः त्वरितं एत ? एत ? ॥ १९ ॥

अर्थः—हे देवो ! भरतक्षेत्रमां जिनेश्वरप्रभुना जन्ममहोत्सवमाटे इंद्र जवाना छे, माटे (तमो सघळा) पोतपोतानी देवांगनाओ-सहित तुरत (त्यां) आवो ? आवो ? ॥ १९ ॥

**अथ ते प्रथितानन्दा वृन्दारकसमुच्चयाः । देवीभिः सममाजग्मुर्जिनजन्मोत्सवेच्छया ॥ २०० ॥**

अन्वयः-अथ प्रथित आनंदाः ते वृंदारक समुच्चयाः जिनजन्म उत्सव इच्छया देवीभिः समं आजग्मुः. ॥ २०० ॥

अर्थः-पछी थयेल छे हर्ष जेओने, एवा ते देवोना समूहो जिनेश्वर प्रभुना जन्ममहोत्सवने उजववानी इच्छाथी ( पोतपोतानी ) देवीओसहित (त्यां) आवी पहोंच्या. ॥ २०० ॥

**पञ्चयोजनशत्युच्चं विमानं लक्षयोजनम् । चक्रे संक्रन्दनादेशात्पालकः पालकाभिधम् ॥ १ ॥**

अन्वयः—पालकः संक्रंदन आदेशात् पंच योजन शती उच्चं, पालक अभिधं लक्ष योजनं विमानं चक्रे. ॥ १ ॥

अर्थः-( पछी ) पालकनामना देवे इंद्रनी आज्ञाथी पांचसो जोजन उंचुं, पालक नामनुं एक लाख जोजनना विस्तारवाळुं विमान बनाव्युं. ॥ १ ॥

**स्तम्भैरंकुरितं कूजत्किङ्किणीभिः सकोकिलम् । मुक्तावचूलैः सत्पुष्पं पताकाभिः सपल्लवम् ॥ २ ॥**

**कलशैः फलितं रत्नप्रभाभिः सारसारणि । देवीभिः केलिशैलाढयं जालजालैर्निकुञ्जभृत् ॥ ३ ॥**

**तारतोरणमालाभिर्लोलदोलालिमालितम् । किंचिद्गम्भीरपीठानामन्तरैर्दीर्घदीर्घिकम् ॥ ४ ॥**

**सुवर्णकेतनश्रीभिर्धूतपुष्परजोभरम् । तज्जङ्गमं महेन्द्रस्य लीलोद्यानमिवाबभौ ॥५॥चतुर्भिः कलापकम्॥**

अन्वयः-स्तंभैः अंकुरितं, कूजत् किंकिणीभिः सकोकिलं, मुक्ता अवचूलैः सत्पुष्पं, पताकाभिः सपल्लवं, ॥ २ ॥ कलशैः फ-

लितं, रत्न प्रभाभिः सार सारणि, देवीभिः केलि शैलाढ्यं, जाल जालैः निकुंजभृत्, ॥ ३ ॥ त्वार तोरण मालाभिः लोल दोला आलि मालितं, किंचित् गंभीर पीठानां अंतरैः दीर्घ दीर्घिकं, ॥ ४ ॥ सुवर्ण केतन श्रीभिः धूत पुष्प रजो भरं, महेंद्रस्य तत् जंगमं लीला उद्यानं इव आबभौ. ॥ ५ ॥ चतुर्भिः कलापकं ॥

अर्थः–स्तंभोवडे करीने (उगी निकळेला) अंकुराओवाळुं, रणझणती घूघरीओवडे (टहुका करती) कोकिलाओवाळुं, मुक्ताफलोना (लटकावेला) झूमखाओवडे उत्तम पुष्पोवाळुं, पताकाओवडे (नवां) पल्लवोवाळुं, ॥ २ ॥ कलशोवडे फलोवाळुं, रत्नोनी कांतिओवडे उत्तम नेहेरोवाळुं, देवीओवडे क्रीडा करवानी टेकरीओवाळुं, झरुखाओना समूहोवडे निकुंजोवाळुं, ॥ ३ ॥ झुलतां तोरणोनी श्रेणिओवडे चपल हींचालाओनी पंक्तिओवडे मंडित थयेलुं, कंइंक गंभीर एवां सिंहासनोनी वच्चे रहेला अंतरोवडे करीने लांबी लांबी वावडीओवाळुं, ॥ ४ ॥ सोनेरी वावटाओनी शोभावडे उडता पुष्पोना रजकणोना समूहवाळुं, एवुं सौधर्मेंद्रनुं ते पालकविमान हालताचालता क्रीडा करवाना जंगम बगीचासरखुं शोभतुं हतुं. ॥ ५ ॥ चतुर्भिः कलापकं ॥

**तत्र तिस्रो व्यराजन्त रत्नसोपानराजयः । सहारोढुमिवेन्द्रस्य मनोवाक्कायसंपदाम् ॥ ६ ॥**

अन्वयः—तत्र इंद्रस्य मनः वाक् काय संपदां सह आरोढुं इव तिस्रः रत्न सोपान राजयः व्यराजंत. ॥ ६ ॥

अर्थः—ते विमानमां इंद्रनी मन, वचन अने कायानी संपत्तिओने एकीवेळाए जाणे चडवामाटे होय नही! तेम रत्नोना पगथीयांओनी त्रण पंक्तिओ शोभती हती. ॥ ६ ॥

आरोहतस्त्रिसोपान्यां सुरांस्तत्तोरणैस्त्रिभिः । इत्थं करम्बितकरैर्नम्यः स्वामीत्यशिक्षयत् ॥ ७ ॥

अन्वयः–त्रिसोपान्यां आरोहतः सुरान्, इत्थं करंबित करैः स्वामी नम्यः, इति त्रिभिः तोरणैः तत् अशिक्षयत् ॥ ७ ॥

अर्थः–पगथीयांओनी त्रणे पंक्तिओपर चडता देवोने, "आवी रीते हाथ जोडीने प्रभुने नमवुं," एम त्रण तोरणोवडे ते विमान (तेओने जाणे) शिखामण आपतुं हतुं. ॥ ७ ॥

वर्तुलो मध्यभूभागस्तत्र चित्रप्रभो बभौ । जम्बूद्वीप इव स्वःश्रीशेखरो जिनजन्मना ॥ ८ ॥

अन्वयः–तत्र चित्र प्रभः वर्तुलः मध्य भू भागः, जिन जन्मना स्वः श्री शेखरः जंबूद्वीपः इव बभौ. ॥ ८ ॥

अर्थः–(वळी) ते पालकविमानमां नाना प्रकारनी कांतिवाळो अने गोळ आकारनो मध्य भागनो पृथ्वीप्रदेश, जिनेश्वर प्रभुना जन्मथी (जाणे) स्वर्गलक्ष्मीना मुकुटवाळा जंबुद्वीप जेवो शोभतो हतो. ॥ ८ ॥

स्वनृत्तदर्शने देवीः स्थिता मूर्त्यन्तरैरिव । पाञ्चालीर्दधदस्यान्तर्जज्ञे प्रेक्षणमण्डपः ॥ ९ ॥

अन्वयः–अस्य अंतः, स्व नृत्त दर्शने मूर्त्यंतरैः स्थिताः देवीः इव, पांचालीः दधत् प्रेक्षण मंडपः जज्ञे. ॥ ९ ॥

अर्थः–ते मध्य प्रदेशमां पोतानुं नृत्य जोवामाटे (पोतानां) बीजां रूपो धारण करीने बेठेली जाणे देवांगनाओ होय नही! एवी पुतळीओने धारण करनारो नाटकमाटेनो रंगमंडप शोभतो हतो. ॥ ९ ॥

चतुर्योजनपिण्डाष्टयोजनायामविस्तृतिः । शोभायाः केलिशैलाभा तत्राभूद्रत्नपीठिका ॥ १० ॥

अन्वयः–तत्र चतुः योजन पिंडा, अष्ट योजन आयाम विस्तृतिः, शोभायाः केलि शैल आभा रत्न पीठिका अभूत्. ॥१०॥
अर्थः–ते मंडपमां चार जोजन जाडी, तथा आठ जोजन लांबी पोहोळी, अने शोभाने क्रीडा करवाना पर्वत सरखी रत्नोनी बनावेली पीठिका हती. ॥ १० ॥

**चलश्रीनिश्चलीकारबन्धरज्जुसहोदरैः । रत्नसिंहासनं रेजे तदुपर्येकमंशुभिः ॥ ११ ॥**

अन्वयः–चल श्री निश्चलीकार बंध रज्जु सहोदरैः अंशुभिः तदुपरि एकं रत्न सिंहासनं रेजे. ॥ ११ ॥
अर्थः—चपल लक्ष्मीने निश्चल करनारां बांधवानां दोरडांसरखां किरणोवडे करीने युक्त थयेलुं, एक रत्नोनुं बनावेलुं सिंहासन ते पीठिकापर शोभतुं हतुं. ॥ ११ ॥

**अर्धमौक्तिकदामालिवृतमौक्तिकदामभाक् । दिव्यश्चन्द्रोदयो वज्राङ्कुशभृत्तदुपर्यभूत् ॥ १२ ॥**

अन्वयः—तदुपरि अर्ध मौक्तिक दाम आलि वृत मौक्तिक दाम भाक्, वज्र अंकुश भृत् दिव्यः चंद्रोदयः अभूत्. ॥ १२ ॥
अर्थः–ते सिंहासनपर अर्धा मोतीओनी माळाओनी पंक्तिथी वींटायेल, एवी मोतीओनी गुंथेली माळाओने धारण करनारो, अने वज्र तथा अंकुशना (चित्रामणवाळो) दिव्य चंदरवो हतो. ॥ १२ ॥

**अन्तःपीठान्मरुद्यक्षत्र्यक्षकाष्ठासु दिद्युते । चतुरशीतिसहस्रेन्द्रसमद्युसदासनैः ॥ १३ ॥**

अन्वयः—अंतः पीठात् मरुत् यक्ष त्र्यक्ष काष्ठासु चतुरशीति सहस्र इंद्र सम द्युसद् आसनैः दिद्युते. ॥ १३ ॥

अर्थः—वचली पीठिकाथी उत्तर, ईशान तथा वायव्य खूणामां चोर्यासी हजार इंद्रसामानिक देवोनां सिंहासनो शोभतां हतां.

**प्राच्यां दिश्यग्र्यदेवीनामासनान्यष्ट रेजिरे । सहस्रा द्वादशाग्नेय्यां चान्तः सभ्यदिवौकसाम् ॥ १४ ॥**

अन्वयः—प्राच्यां दिशि अग्र्य देवीनां अष्ट आसनानि रेजिरे, आग्नेय्यां च अंतःसभ्य दिवौकसां द्वादश सहस्राः. ॥ १४ ॥

अर्थः—वळी पूर्वदिशामां अग्रमहिषीओनां आठ, तथा अग्निखूणामां अभ्यंतर पार्षद देवोनां बार हजार सिंहासनो शोभतां हतां॥१४॥

**चतुर्दश सहस्राणि दक्षिणाशाविभूषणम् । आसनान्यभवन्नाकसदां मध्यसभासदाम् ॥ १५ ॥**

अन्वयः—मध्य सभासदां नाकसदां दक्षिण आशा विभूषणं चतुर्दश सहस्राणि आसनानि अभवन्. ॥ १५ ॥

अर्थः—वळी मध्यसभासद देवोनां दक्षिण दिशाने शोभावनारां चौद हजार आसनो (त्यां) हतां. ॥ १५ ॥

**बहिःसभासदां स्वर्गवासिनामासनावलिः । षोडशानां सहस्राणां नैर्ऋत्यामभवद्दिशि ॥ १६ ॥**

अन्वयः—नैर्ऋत्यां दिशि षोडशानां सहस्राणां बहिः सभासदां स्वर्ग वासिनां आसन आवलिः अभवत्. ॥ १६ ॥

अर्थ—(वळी) नैर्ऋत्य दिशामां शोळ हजार बाह्य पर्षदानां सभ्य देवोनां आसनोनी श्रेणि (त्यां) हती. ॥ १६ ॥

**सप्तसंख्यानि सप्तानां सेनापतिदिवौकसाम् । आशायां पाशहस्तस्य रेजिरे सिंहविष्टराः ॥ १७ ॥**

अन्वयः—पाशहस्तस्य आशायां सप्तानां सेनापति दिवौकसां सप्त संख्यानि सिंह विष्टराः रेजिरे. ॥ १७॥

अर्थः—पश्चिम दिशामां सात सेनापति देवोनां सात सिंहासनो शोभतां हतां. ॥ १७ ॥

**चतुर्भिरधिकाशीतिः सहस्राण्यङ्गरक्षिणाम् । औचित्येनासनान्यासन्परितो वासवासनम् ॥ १८ ॥**

अन्वयः—वासव आसनं परितः चतुर्भिः अधिक अशीतिः सहस्राणि अंगरक्षिणां औचित्येन आसनानि आसन्. ॥ १८ ॥

अर्थः—(वळी) इन्द्रनां आसनने फरतां चोर्यासी हजार अंगरक्षकदेवोनां योग्यता मुजब आसनो गोठवेलां हतां. ॥ १८ ॥

**विमानं विरचय्यैवं त्रिदशैराभियोगिकैः । शक्रो विज्ञपयांचक्रे तदा तदधिरोहणे ॥ १९ ॥**

अन्वयः–एवं आभियोगिकैः देवैः विमानं विरचय्य, तदा शक्रः तत् अधिरोहणे विज्ञपयां चक्रे. ॥ १९ ॥

अर्थः–एवीरीते आभियोगिक देवोपासे विमाननी रचना करावीने इन्द्रे ते वखते ते विमानमां चडवा माटे (सर्वने) आज्ञा करी.

**अन्यैर्नानाविमानालिलासिभिः स्वर्गवासिभिः । वृतं स्फुरद्भिरम्भोजं हंसैः पत्ररथैरिव ॥ २० ॥**

**विकृत्याद्भुतरूपर्द्धिं स्वर्भूपः सपरिच्छदः । तद्विमानं समारोहद्रोहन्माङ्गलिकध्वनिः ॥ २१ ॥ युग्मम् ॥**

अन्वयः–स्फुरद्भिः पत्ररथैः हंसैः अंभोजं इव, नाना विमान आलि लासिभिः अन्यैः स्वर्ग वासिभिः वृतं, ॥२०॥ तद्विमानं, रोहत् मांगलिक ध्वनिः सपरिच्छदः स्वर्भूपः अद्भुत रूप ऋद्धि विकृत्य समारोहत्. ॥ २१ ॥ युग्मं ॥

अर्थः—स्फुरायमान थती पांखोवडे उडता हंसोवडे करीने जेम कमळ घेराय, तेम विविध प्रकारनां विमानोनी श्रेणिमां आनंद पूर्वक बेठेला बीजा देवोवडे वींटायेलां. ॥ २० ॥ ते विमानपर, विस्तार पामता मांगलिक ( वाजित्रोना ) अवाजवाळो, परिवार-

सहित ते इंद्र, पोतानां अद्भूत स्वरूपनी समृद्धि विकुर्वीने चड्यो. ॥ २१ ॥ युग्मं ॥

**पुरुहूतः पुरोभूतदर्पणाद्यष्टमङ्गलः । महासिंहासनासीनस्तद्विमानमदीदिपत् ॥ २२ ॥**

अन्वयः–पुरोभूत दर्पण आदि अष्टमंगलः, महासिंहासन आसीनः पुरुहूतः तत् विमानं अदीदिपत्. ॥ २२ ॥

अर्थः—आगळ रहेल छे दर्पण आदिक आठ मंगलो जेने, तथा महान् सिंहासनपर बेठेलो ते सौधर्मेंद्र ते विमानने दीपाववा लाग्यो. ॥ २२ ॥

**तिर्यग्मार्गेण सौधर्मादुत्तरेण तदुत्तरत् । द्वीपं नन्दीश्वरं प्रापासंख्यद्वीपाब्धिलङ्घनात् ॥ २३ ॥**

अन्वयः—सौधर्मात् उत्तरेण तिर्यग्मार्गेण उत्तरत् तत् असंख्य द्वीप अब्धि लंघनात् नंदीश्वरं द्वीपं प्राप. ॥ २३ ॥

अर्थः–सौधर्मदेवलोकथी उत्तरे तीर्छा मार्गे उतरतुं ते विमान असंख्याता द्वीपसमुद्रोने ओळंगीने नंदीश्वर नामना द्वीपमां आव्युं.

**तत्राग्नेय्यां दिशि प्राप्य गिरिं रतिकरं हरिः । संचिक्षेप विमानं तन्मानं साधुजनो यथा ॥ २४ ॥**

अन्वयः—तत्र यथा साधु जनः मानं (तथा) हरिः आग्नेय्यां दिशि रतिकरं गिरिं प्राप्य तत् विमानं संचिक्षेप. ॥ २४ ॥

अर्थः—ते द्वीपमां (आवीने) जेम मुनिराज माननो संकोच करे, तेम इन्द्रे अग्निखूणामां आवेला रतिकर पर्वतपासे आवीने ते विमानने संकोची लीधुं, (अर्थात् नाना प्रमाणवालुं कर्युं) ॥ २४ ॥

**द्वीपानब्धीनतिक्रामन्क्रमतस्तच्च संक्षिपन् । एत्य चम्पेशसौधस्य ददौ तिस्रः प्रदक्षिणाः ॥ २५ ॥**

अन्वयः—द्वीपान् अब्धीन् अतिक्रामन्, च क्रमतः तत् संक्षिपन्, एत्य चंपेश सौधस्य तिस्रः प्रदक्षिणाः ददौ. ॥ २५ ॥

अर्थः—(पछी) द्वीपो तथा समुद्रोने ओळंगीने, अनुक्रमे ते विमानने संकोचतांथकां सौधर्मेंद्रे चंपा नगरीमां आवीने ते वसुपूज्य-राजाना मेहेलने त्रण प्रदक्षिणाओ आपी. ॥ २५ ॥

**मुक्त्वा विमानमैशान्यां दिशि सूतिगृहं ततः । स त्रिः प्रदक्षिणीकृत्यानमन्मातृयुतं जिनम् ॥ २६ ॥**

अन्वयः—ततः विमानं ऐशान्यां दिशि मुक्त्वा सः सूतिगृहं त्रिः प्रदक्षिणीकृत्य मातृयुतं जिनं अनमत्. ॥ २६ ॥

अर्थः—पछी ते विमानने ईशान खूणामां मूकीने ते इंद्रे ते सूतिकाघरने त्रण प्रदक्षिणा फरीने मातासहित जिनेश्वरप्रभुने नमस्कार कर्यो. ॥ २६ ॥

**जन्मोत्सवं भवत्सूनोर्वयं कर्तुमिहागताः । न्यवेदयदिदं देव्यै शङ्काशङ्कुहृते हरिः ॥ २७ ॥**

अन्वयः—भवत्सूनोः जन्म उत्सवं कर्तुं वयं इह आगताः, इदं हरिः शंका शंकुहृते देव्यै न्यवेदयत्. ॥ २७ ॥

अर्थः—( हे माताजी ! ) आपना पुत्रनो जन्ममहोत्सव करवाने अमो अहीं आव्या छीये, एरीते इंद्रे शंकारूपी शल्यने दूर करवामाटे प्रभुनी माताने निवेदन कर्युं. ॥ २७ ॥

**दत्वासौ स्वापिनीं देव्या मुक्त्वात्र प्रतिमां प्रभोः । हृद्यमान्तीं मुदं धर्तुमिवाधाद्रूपपञ्चकम् ॥ २८ ॥**

अन्वयः—असौ देव्याः स्वापिनीं दत्वा, अत्र प्रभोः प्रतिमां मुक्त्वा, हृदि अमांतीं मुदं धर्तुं इव रूपपंचकं अधात्. ॥ २८ ॥

अर्थः–पछी ते इंद्रे प्रभुनी माताने अवस्वापिनी निद्रा देइने, तथा त्यां प्रभुनुं प्रतिरूप मूकीने, हृदयमां नही माता हर्षने जाणे अटकावी राखवामाटे होय नही ! तेम तेणे ( पोतानां) पांचरूपो धारण कर्यां. ॥ २८ ॥

**गोशीर्षद्रवसौरभ्यभासुरेऽसौ सुरेश्वरः । तीर्थकरं करद्वन्द्वे मूर्त्याधारयदेकया ॥ २९ ॥**

अन्वयः–असौ सुरेश्वरः एकया मूर्त्या गोशीर्ष द्रव सौरभ्य भासुरे करद्वंद्वे तीर्थकरं अधारयत्. ॥ २९ ॥

अर्थः—ते इंद्रे ( पोतानां ) एकरूपवडे करीने गोशीर्ष चंदनना रसनी सुगंधिथी मनोहर थयेला बन्ने हाथमां तीर्थंकरप्रभुने धारण कर्या. ॥ २९ ॥

**छत्रं मूर्त्यैकया द्वाभ्यां चामरे चामरेश्वरः । एकया तु पुरः क्षिप्रप्रतीष्टं कुलिशं दधौ ॥ ३० ॥**

अन्वयः–च अमरेश्वरः एकया मूर्त्या छत्रं, द्वाभ्यां चामरे, तु एकया पुरः क्षिप्रप्रतीष्टं कुलिशं दधौ. ॥ ३० ॥

अर्थः–वळी ते इंद्र एकरूपवडे छत्रने, बे रूपवडे बे चामरोने, तथा एक रूपवडे वज्रने धारण करी आगळना भागमां चालवा लाग्यो.

**नानारूपधरैर्नानाकुतूहलमनोहरैः । जगामाथ मरुन्नाथः सुरशैलं सुरैर्वृतः ॥ ३१ ॥**

अन्वयः—अथ सुरनाथः नाना रूप धरैः नाना कुतूहल मनोहरैः सुरैः वृतः सुर शैलं जगाम. ॥ ३१ ॥

अर्थः–पछी ते इंद्र, विविध प्रकारनां रूपोने धरनारा, तथा विविध प्रकारनां कुतूहलोथी मनोहर लागता देवोवडे वींटायोथको मेरुपर्वत उपर गयो. ॥ ३१ ॥

तच्चूलां दक्षिणेनायं वने पांडकनामनि । अतिपाण्डुकम्बलायां शिलायाममलद्युतौ ॥ ३२ ॥
अपूर्वसंमदः पूर्वदिक्पतिः पूर्वदिग्मुखः । स्नानसिंहासनं भेजे शक्रः क्रोडीकृतप्रभुः ॥ ३३ ॥ युग्मम् ॥

अन्वयः—तच्चूलां दक्षिणेन पांडकनामनि वने, अमल द्युतौ अतिपांडु कंबलायां शिलायां, अपूर्व संमदः अयं पूर्वदिक्पतिः शक्रः पूर्वदिग्मुखः क्रोडीकृत प्रभुः स्नान सिंहासनं भेजे. ॥ ३२ ॥ ३३ ॥ युग्मं ॥

अर्थः—तेना शिखरनी दक्षिणे पांडकनामना वनमां रहेली निर्मल कांतिवाळी अतिपांडुकंबला नामनी शिलापर, अति आनंद पामेलो ते पूर्व दिशानो स्वामी इंद्र, पूर्व दिशातरफ मुख राखीने, तथा प्रभुने पोताना खोळामां लेइने स्नानमाटेना सिंहासनपर बेठो.

इहान्तरे महाघोषाघण्टाघोषावबोधिनाम् । वृतो विमानिनां लक्षैरष्टाविंशतिसंमितैः ॥ ३४ ॥
ईशानाधिपतिः शूलशाली वृषभवाहनः । कृते पुष्पकदेवेन विमाने पुष्पके स्थितः ॥ ३५ ॥ युग्मम् ॥

अन्वयः—इह अंतरे महाघोषा घंटा घोष अवबोधिनां विमानिनां अष्टाविंशति संमितैः लक्षैः वृतः ॥ ३४ ॥ शूल शाली, वृषभ वाहनः ईशान अधिपतिः पुष्पक देवेन कृते पुष्पके विमाने स्थितः. ॥ ३५ ॥ युग्मं ॥

अर्थः—एवामां महाघोषानामना घंटना अवाजथी सावधान थयेला अठ्ठावीसलाख देवोथी वींटायेलो, ॥ ३४ ॥ शूलथी मनोहर लागतो तथा वृषभना वाहनवाळो ईशानेंद्र पुष्पकदेवे रचेलां पुष्पकनामनां विमानमां बेठो. ॥ ३५ ॥ युग्मं ॥

**ईशानकल्पादुत्तीर्य तिर्यग्दक्षिणवर्त्मना । एत्य नन्दीश्वरं दिश्यैशान्यां रतिकरे गिरौ ॥ ३६ ॥**
**क्रमाद्विमानं संक्षिप्य सौधर्माधिपतिर्यथा । काञ्चनाचलचूलायां भक्त्याग्रे जिनमाययौ ॥ ३७ ॥**

अन्वयः—ईशानकल्पात् तिर्यग्दक्षिण वर्त्मना उत्तीर्य, नंदीश्वरं एत्य, ऐशान्यां दिशि रतिकरे गिरौ, ॥ ३६ ॥ क्रमात् विमानं संक्षिप्य, यथा सौधर्म अधिपतिः, भक्त्या कांचनाचल चूलायां जिनं अग्रे आययौ. ॥ ३७ ॥ युग्मं ॥

अर्थः—पछी ईशानदेवलोकथी तीर्छी दक्षिणतरफना मार्गे उतरीने, नंदीश्वरद्वीपमां आवी, ईशानखूणामां रतिकरपर्वतपर, ॥३६॥ अनुक्रमे विमानने संकोचीने सौधर्मेंद्रनीपेठे भक्तिथी ते ईशानेंद्र पण मेरुपर्वतना शिखरपर जिनेश्वरप्रभुनीपासे आव्यो. ॥ ३७ ॥

**आगाद् द्वादशभिर्लक्षैर्वृतो वैमानिकैः सुरैः । सनत्कुमारः सुमनोविमानस्थः प्रभोः पुरः ॥ ३८ ॥**

अन्वयः—द्वादशभिः लक्षैः वैमानिकैः सुरैः वृतः सनत्कुमारः सुमनः विमानस्थः प्रभोः पुरः आगात्. ॥ ३८ ॥

अर्थः—वळी बार लाख वैमानिक देवोथी वींटायेलो सनत्कुमारनामनो इन्द्र पण (पोताना) सुमननामना विमानमां बेसीने त्यां प्रभुनी पासे आव्यो. ॥ ३८ ॥

**माहेन्द्रोऽष्टविमानेशलक्षैर्युक्तो महर्द्धिभिः । श्रीवत्साख्यविमानेन प्रभोरभ्यर्णमागमत् ॥ ३९ ॥**

अन्वयः—महर्द्धिभिः अष्ट विमान ईश लक्षैः युक्तः माहेंद्रः श्रीवत्स आख्य विमानेन प्रभोः अभ्यर्णे आगमत्. ॥ ३९ ॥

अर्थः—महान् समृद्धिवाळा आठ लाख वैमानिक देवोथी युक्त थयेलो माहेंद्र नामनो इंद्र पोताना श्रीवत्स नामना विमानमां बे-

सीने प्रभुनीपासे आव्यो. ॥ ३९ ॥

**वैमानिकैश्चतुर्लक्षैः सुरैर्ब्रह्मपतिर्वृतः । नन्द्यावर्तविमानस्थः समागाज्जिनसन्निधौ ॥ ४० ॥**

अन्वयः—चतुर्लक्षैः वैमानिकैः सुरैः वृतः ब्रह्मपतिः नंद्यावर्त विमानस्थः जिनसन्निधौ समागात्. ॥ ४० ॥

अर्थः—वळी चार लाख वैमानिक देवोथी वींटायेलो ब्रह्मपतिनामनो इन्द्र पोताना नंद्यावर्त नामना विमानमां बेसीने प्रभुनी पासे आव्यो. ॥ ४० ॥

**पञ्चाशता विमानेशसहस्रैः परिवारितः । लान्तकेन्द्रः कामगवविमानस्थस्तथाऽऽययौ ॥ ४१ ॥**

अन्वयः—तथा पंचाशता विमानेश सहस्रैः परिवारितः लांतकेंद्रः कामगव विमानस्थः आययौ. ॥ ४१ ॥

अर्थः—वळी पचास हजार वैमानिक देवोना परिवारवाळो लांतक देवलोकनो इन्द्र पोताना कामगवनामना विमानमां बेसीने त्यां आवी पहोंच्यो. ॥ ४१ ॥

**आगाद्वैमानिकामर्त्यचत्वारिंशत्सहस्रयुक् । शुक्रशक्रः प्रीतिगमविमानेन जिनान्तिकम् ॥ ४२ ॥**

अन्वयः—वैमानिक अमर्त्य चत्वारिंशत् सहस्रयुक् शुक्र शक्रः प्रीतिगम विमानेन जिन अंतिकं आगात्. ॥ ४२ ॥

अर्थः—वळी चाळीस हजार वैमानिक देवोसहित शुक्र देवलोकनो इन्द्र प्रीतिगम नामना पोताना विमानमां बेसीने प्रभुनी पासे आव्यो. ॥ ४२ ॥

मनोरमविमानस्थः सहस्रारसुरेश्वरः । षड्विमानसहस्रेशैर्वृतो देवैरिहागमत् ॥ ४३ ॥

अन्वयः-षड् विमान सहस्र ईशैः देवैः वृतः, मनोरम विमानस्थः सहस्रार सुर ईश्वरः इह आगमत्. ॥ ४३ ॥

अर्थः-वळी छहजार वैमानिक देवोथी वींटायेलो, तथा मनोरम नामना विमानमां बेठेलो सहस्रारनामना देवलोकनो इन्द्र पण त्यां आव्यो. ॥ ४३ ॥

आनतप्राणतस्वामी विमलाख्यविमानभाक् । आजगामामरैर्युक्तो विमानेशैश्चतुःशतैः ॥ ४४ ॥

अन्वयः—चतुःशतैः विमान ईशैः अमरैः युक्तः विमल आख्य विमानभाक् आनत प्राणत स्वामी आजगाम. ॥ ४४ ॥

अर्थः—वळी चारसो वैमानिक देवोथी युक्त थयेलो, अने विमल नामना विमानमां बेठेलो आनत तथा प्राणत देवलोकनो इन्द्र पण त्यां आव्यो. ॥ ४४ ॥

त्रिविमानिशतैर्देवैरारणाच्युतवासवः । इहागात्सर्वतोभद्रविमानस्थः सुराचले ॥ ४५ ॥

अन्वयः-त्रिविमानि शतैः देवैः आरण अच्युत वासवः, सर्वतोभद्र विमानस्थः इह सुर अचले आगात्, ॥ ४५ ॥

अर्थः—वळी त्रणसो वैमानिक देवो सहित आरण तथा अच्युत देवलोकनो इन्द्र सर्वतोभद्र नामना (पोताना) विमानमां बेसीने अहीं मेरुपर्वतपर आव्यो. ॥ ४५ ॥

पृथ्व्यां रत्नप्रभानाम्न्यां बाहल्यामध्यवासिनाम् । भवनव्यन्तरेन्द्राणामकम्पन्तासनान्यथ ॥ ४६ ॥

अन्वयः—अथ रत्नप्रभा नाम्न्यां पृथ्व्यां बाहल्यामध्यवासिनां भवन व्यंतर इन्द्राणां आसनानि अकंपंत ॥ ४६ ॥

अर्थः—वळी रत्नप्रभानामनी पृथ्वीनी जाडाइना मध्यभागमां रहेनारा भवनपतिओ तथा व्यंतरोना इन्द्रोनां आसनो (पण) कंपायमान थयां. ॥ ४६ ॥

**पुर्यां चमरचञ्चायां चमरोऽसुरवासवः । सुधर्माख्यसभामध्ये निषण्णश्चमरासने ॥ ४७ ॥**

**ज्ञात्वावधेर्जनिं जैनीं जनज्ञप्त्यै त्ववादयत् । घण्टां मोघस्वरां पत्त्यनीकपेन द्रुमेण सः ॥ ४८ ॥युग्मम्॥**

अन्वयः—चमरचंचायां पुर्यां सुधर्माख्य सभा मध्ये चमरासने निषण्णः असुर वासवः सः चमरः, अवधेः जैनीं जनिं ज्ञात्वा जनज्ञप्त्यै पत्ति अनीकपेन द्रुमेण मोघस्वरां घंटां तु अवादयत्. ॥ ४७ ॥ ४८ ॥ युग्मं ॥

अर्थः—चमरचंचानामनी नगरीमां, सुधर्मा नामनी सभामां, चमर नामना आसनपर बेठेला असुरोना इन्द्र ते चमरेन्द्रे अवधिज्ञानथी जिनेश्वरप्रभुनो जन्म थयेलो जाणीने लोकोने (त्यांना देवोने) ते जणाववा माटे द्रुमनामना पोताना पायदळना सेनापतिपासे मोघस्वरनामनो घंट वगडाव्यो. ॥ ४७ ॥ ४८ ॥ युग्मं ॥

**सामसद्भिस्त्रिस्त्रिभिर्युक्तश्चतुर्भिर्लोकपालकैः । पञ्चभिः पट्टदेवीभिर्महानीकैश्च सप्तभिः ॥ ४९ ॥**

**सप्तभिः पृतनाधीशैरन्यैरप्यसुरैर्घनैः । चतुःषष्टिसहस्रैश्च सामानिकमहासुरैः ॥ ५० ॥**

प्रतिकाष्ठं चतुःषष्टिसहस्रैरङ्गरक्षिणाम् । त्रायस्त्रिंशैस्त्रयस्त्रिंशत्संमितैः परमार्द्धिकः ॥ ५१ ॥
पञ्चयोजनशत्युच्चं चारुध्वजविराजितम् । पञ्चाशतं सहस्राणि योजनान्यभिविस्तृतम् ॥ ५२ ॥
विमानमभियोगेन सद्यो देवेन निर्मितम् । आरुह्याभ्यचलद्भक्त्या कर्तुं जन्मोत्सवं विभोः ॥ ५३ ॥

अन्वयः—तिसृभिः संसद्भिः, चतुर्भिः लोकपालकैः, पंचभिः पट्टदेवीभिः, च सप्तभिः महानीकैः युक्तः, ॥ ४९ ॥ सप्तभिः पृतनाधीशैः, अन्यैः अपि घनैः असुरैः, च चतुःषष्टि सहस्रैः सामानिक महाऽसुरैः, ॥ ५० ॥ प्रतिकाष्ठं अंगरक्षिणां चतुःषष्टि सहस्रैः, त्रयस्त्रिंशत्संमितैः त्रायस्त्रिंशैः परम ऋद्धिकः, ॥ ५१ ॥ पंच योजन शती उच्चं, चारुध्वज विराजितं, पंचाशतं सहस्राणि योजनानि अभिविस्तृतं, ॥ ५२ ॥ अभियोगेन देवेन सद्यः विनिर्मितं विमानं आरुह्य, भक्त्या विभोः जन्म उत्सवं कर्तुं अभ्यचलत्. ॥ ५३ ॥

अर्थः—त्रण पर्षदा, चार लोकपालो, पांच पट्टदेवीओ, तथा सात म्होटां सैन्योथी युक्त थयेलो, ॥४९॥ तेमज सात सेनापतिओ तथा बीजा पण घणा असुरो, अने चोसठ हजार महान् सामानिक असुरोथी युक्त थयेलो, ॥ ५० ॥ वळी दरेक दिशामां चोसठ हजार अंगरक्षक असुरोथी, अने तेत्रीस त्रायस्त्रिंश असुरो सहित उत्कृष्टी समृद्धिवाळो, ॥५१॥ पांचसो जोजन उंचां, मनोहर ध्वजाओथी शोभितां, तथा पचास हजार जोजना विस्तारवाळां, ॥ ५२ ॥ अभियोग नामना असुरदेवे तुरत रचेला, एवां विमानपर आरूढ थइने ते चमरेंद्र भक्तिथी प्रभुनो जन्म महोत्सव करवाने चालवा लाग्यो. ॥ ५३ ॥पंचभिः कुलकं॥

मार्गे संक्षिप्य संक्षिप्य विमानमसुरेश्वरः। सौधर्मेन्द्र इवाभ्यागान्मेरुं विभुविभूषितम् ॥ ५४ ॥

अन्वयः—मार्गे विमानं संक्षिप्य संक्षिप्य असुरेन्द्रः सौधर्म इन्द्रः इव विभु विभूषितं मेरुं अभ्यागात्. ॥ ५४ ॥

अर्थः—मार्गमां विमानने संकोची संकोचीने ते असुरेन्द्र दण सौधर्मेंद्रनी पेठे प्रभुथी विभूषित थयेला मेरुपर्वतपर आव्यो. ॥

असुरेन्द्रो बलिर्नाम बलिचश्चापुरीपतिः। महौघस्वरघण्टायाः कारयित्वाथ वादनम् ॥ ५५ ॥

महाद्रुमाख्यसेनान्याहूतैः षष्टिसहस्रकैः। सामानिकसुरैस्तेभ्यश्चाङ्गरक्षैश्चतुर्गुणैः ॥ ५६ ॥

त्रायस्त्रिंशादिकैरन्यैरसुरैः परितो वृतः। आगादुत्तमयानेन मेरुश्रृङ्गे महोत्सवात् ॥ ५७ ॥

अन्वयः—अथ बलिचंचापुरी पतिः बलिः नाम असुर इन्द्रः महौघ स्वर घंटायाः वादनं कारयित्वा, ॥ ५५ ॥ महाद्रुम आख्य सेनानी आहूतैः षष्टि सहस्रकैः सामानिक सुरैः, च तेभ्यः चतुर्गुणैः अंगरक्षैः, ॥ ५६ ॥ त्रायस्त्रिंशादिकैः अन्यैः असुरैः परितः वृतः, महोत्सवात् उत्तम यानेन मेरुशृंगे आगात्. ॥ ५७ ॥ त्रिभिर्विशेषकं. ॥

अर्थः—पछी बलिचंचा नगरीनो स्वामी बलि नामनो असुरेन्द्र महौघस्वर नामनो घंट वगडावीने, ॥ ५५ ॥ महाद्रुमनामना सेनापतिए बोलावेला साठ हजार सामानिक असुर देवोथी, तथा तेथी चारगणा अंगरक्षक देवोथी ॥ ५६ ॥ अने त्रायस्त्रिंशआदिक बीजा असुरोथी वींटायो थको महान् उत्सवपूर्वक उत्तम विमानमां बेसीने मेरुपर्वतना शिखरपर आव्यो. ॥ ५७ ॥ त्रिभिर्विशेषकं

फणीन्द्रो धरणो मेघस्वराघण्टाभिताडनात् । सेनान्या भद्रसेनेन बोधितैर्जनिमर्हतः ॥ ५८ ॥
सामानिकोरगैः षड्भिः सहस्रैः परमार्द्धिकः । चतुर्विंशत्यङ्गरक्षसहस्रैर्भूरिभक्तिभिः ॥ ५९ ॥
षड्भिरुत्तमदेवीभिरन्यैर्नागकुलैर्वृतः । सार्धद्वियोजनशतप्रोत्तुङ्गं ध्वजमण्डलम् ॥ ६० ॥
सहस्रपञ्चविंशत्या योजनैर्जातविस्तृति । विमानरत्नमारुह्य मेरुमूर्ध्नि समागमत् ॥ ६१ ॥

अन्वयः—धरणः फणि इन्द्रः मेघस्वरा घंटा अभिताडनात् भद्रसेनेन सेनान्या अर्हतः जनिं बोधितैः, ॥५८॥ षड्भिः सहस्रैः सामानिक उरगैः, भूरि भक्तिभिः चतुर्विंशति अंगरक्षसहस्रैः परम ऋद्धिकः, ॥५९॥ षड्भिः उत्तम देवीभिः, अन्यैः नागकुलैः वृतः, सार्ध द्वि योजनशत प्रोत्तुंगं, ध्वज मंडलं, ६० सहस्र पंच विंशत्या योजनैः जात विस्तृति, विमानरत्नं आरुह्य मेरु मूर्ध्नि समागमत्.

अर्थः—पछी नागदेवोनो धरणेंद्र नामनो इंद्र, मेघस्वरानामनो घंट वगडावीने भद्रसेन नामना सेनापतिमारफते तीर्थंकर प्रभुनो जन्म जाहेर करीने, ॥५८॥ छहजार सामानिक नागदेवोसहित, तथा घणी भक्तिवाळा चोवीसहजार अंगरक्षक नागदेवोथी परम समृद्धिवाळो, ॥५९॥ छ उत्तम देवीओ, तथा बीजा नागदेवोना समूहोथी वींटायेलो, अढीसो जोजन उंचां, तथा ध्वजाओना समूहवाळां अने पचीस हजार जोजनना विस्तारवाळा विमानमां बेसीने मेरुपर्वतना शिखरपर आव्यो. ॥६१॥ चतुर्भिः कलापकं॥

भूतानन्दाभिधो मेघस्वराघण्टाभिवादनात् । सेनाधीशेन दक्षेणाहूतैः सामानिकादिभिः ॥ ६२ ॥

**नागलोकैर्वृतो नागनाथो निर्भरभक्तिभाक्। आगाद्दिव्यविमानस्थः सनाथं स्वामिना नगम् ॥६३॥युग्मम्॥**

अन्वयः—दक्षेण सेनाधीशेन मेघस्वरा घंटा अभिवादनात् आहूतैः सामानिकादिभिः नागलोकैः वृतः भूतानंद अभिधः नागनाथः निर्भर भक्तिभाक् दिव्य विमानस्थः स्वामिना सनाथं नगं आगात्. ॥ ६२ ॥ ६३ ॥ युग्मं ॥

अर्थः—दक्षनामना सेनापति मारफते मेघस्वरानामनो घंट वगडावीने बोलावेला सामानिकआदिक नागदेवोथी वींटायेलो भूतानंदनामनो नागेंद्र अत्यंत भक्तियुक्त थयोथको दिव्य विमानमां बेसीने तीर्थंकरप्रभुवडे मंडित थयेला मेरुपर्वतपर आव्यो.॥६२॥६३॥

**हरिस्तथा हरिसहो विद्युत्कुमारवासवौ । वेणुदारी वेणुदेवः सुपर्णानां पुरन्दरौ ॥ ६४ ॥**

अन्वयः—विद्युत्कुमार वासवौ हरिः तथा हरिसहः, सुपर्णानां पुरंदरौ वेणुदारी वेणुदेवः. ॥ ६४ ॥

अर्थः—विद्युत्कुमारोना हरि तथा हरिसहनामना बे इंद्रो, अने सुपर्णना वेणुदारी, तथा वेणुदेवनामना बे इंद्रो आव्या. ॥ ६४ ॥

**अग्निमाणवोऽग्निशिखश्चेन्द्रावग्निकुमारकौ । शक्रौ वायुकुमाराणां वेलम्बोऽथ प्रभञ्जनः ॥ ६५ ॥**

अन्वयः—अथ अग्निमाणवः च अग्निशिखः अग्निकुमारकौ इंद्रौ, वेलंबः, प्रभंजनः वायुकुमाराणां शक्रौ. ॥ ६५ ॥

अर्थः—वळी अग्निमाणव तथा अग्निशिख नामना अग्निकुमारोना इन्द्रो, तथा वेलंब अने प्रभंजन नामना वायुकुमारोना इन्द्रो आव्या.

**महाघोषः सुघोषश्च स्तनितानां सुराधिपौ । तथोदधिकुमारेन्द्रौ जलकान्तजलप्रभौ ॥ ६६ ॥**

अन्वयः—महाघोषः च सुघोषः स्तनितानां सुराधिपौ, तथा जलकांत जलप्रभौ उदधि कुमार इंद्रौ. ॥ ६६ ॥

अर्थः—महाघोष अने सुघोष नामना स्तनितकुमारोना बे इंद्रो, तथा जलकांत अने जलप्रभनामना उदधिकुमारना बे इंद्रो आव्या.

**तथा पूर्णोऽवशिष्टश्च शक्रौ द्वीपकुमारकौ । वासवौ दिक्कुमाराणाममितोऽमितवाहनः ॥ ६७ ॥**

अन्वयः–तथा पूर्णः च अवशिष्टः द्वीपकुमारकौ शक्रौ, अमितः, अमितवाहनः दिक्कुमाराणां वासवौ. ॥ ६७ ॥

अर्थः–वळी पूर्ण अने अवशिष्ट नामना बे द्वीपकुमारोना इंद्रो, तथा अमित अने अमितवाहननामना बे दिक्कुमारोना इंद्रो आव्या.

**महाकालश्च कालश्च व्यन्तराणां सुरेश्वरौ । सुरूपः प्रतिरूपश्च भूतानामधिपौ हरी ॥ ६८ ॥**

अन्वयः–महाकालः च कालः व्यंतराणां सुरेश्वरौ, सुरूपः च प्रतिरूपः भूतानां अधिपौ हरी. ॥ ६८ ॥

अर्थः—वळी महाकाल तथा कालनामना व्यंतरोना बे इंद्रो, तथा सुरूप अने प्रतिरूपनामना भूतोना बे इंद्रो आव्या. ॥ ६८ ॥

**माणिभद्रः पूर्णभद्रो वासवौ यक्षरक्षकौ । महाभीमश्च भीमश्च राक्षसाखण्डलौ वरौ ॥ ६९ ॥**

अन्वयः–माणिभद्रः, पूर्णभद्रः यक्षरक्षकौ वासवौ, च महाभीमः च भीमः वरौ राक्षस आखंडलौ. ॥ ६९ ॥

अर्थः—वळी माणिभद्र तथा पूर्णभद्रनामना यक्षोना बे इंद्रो, अने महाभीम तथा भीमनामना राक्षसोना बे उत्तम इंद्रो आव्या.

**किन्नराणां किंपुरुषः किन्नरश्च मरुत्पती । किंपुरुषेन्द्रौ महापुरुषसत्पुरुषाभिधौ ॥ ७० ॥**

अन्वयः–किंपुरुषः च किन्नरः, किन्नराणां मरुत्पती, महापुरुष सत्पुरुष अभिधौ किंपुरुष इन्द्रौ. ॥ ७० ॥

अर्थः—किंपुरुष अने किन्नरनामना किन्नरोना बे इन्द्रो, तथा महापुरुष अने सत्पुरुषनामना किंपुरुषोना बे इन्द्रो आव्या.

**अतिकायमहाकायौ महोरगमहाधिपौ । गीतयशोगीतरती गन्धर्वत्रिदशेश्वरौ ॥ ७१ ॥**

अन्वयः–अतिकाय महाकायौ महोरग महाधिपौ, गीत यशः गीतरती गंधर्व त्रिदश ईश्वरौ. ॥ ७१ ॥

अर्थः–वळी अतिकाय अने महाकायनामना महोरगोना बे इन्द्रो, तथा गीतयशः अने गीतरतीनामना गंधर्वोना बे इन्द्रो आव्या.

**अथाप्रज्ञप्तिपञ्चप्रज्ञप्त्यादीनां समाययुः । व्यन्तराष्टनिकायानां षोडश त्रिदशेश्वराः ॥ ७२ ॥**

अन्वयः–अथ अप्रज्ञप्ति पंचप्रज्ञप्ति आदीनां व्यंतर अष्ट निकायानां षोडश त्रिदश ईश्वराः समाययुः ॥ ७२ ॥

अर्थः—वळी अणपन्नी अने पणपन्नी आदिक आठ व्यंतर निकायोना शोळ इन्द्रो आव्या. ॥ ७२ ॥

**तत्राप्रज्ञप्तिदेवेन्द्रौ सन्निहितसमानकौ । इन्द्रौ धाता विधाता च पञ्चप्रज्ञप्तिपालकौ ॥ ७३ ॥**

अन्वयः—तत्र सन्निहित समानकौ अप्रज्ञप्ति देवेंद्रौ, च धाता विधाता पंचप्रज्ञप्ति पालकौ इन्द्रौ. ॥ ७३ ॥

अर्थः–तेमां सन्निहित अने समानकनामना अणपन्नीना बे इन्द्रो, तथा धाता अने विधाता नामना पणपन्नीना बे इन्द्रो जाणवा.

**ऋषिवादितिकाधीशावृषिश्च ऋषिपालकः । भूतवादितिकाशक्रौ तथेश्वरमहेश्वरौ ॥ ७४ ॥**

अन्वयः–ऋषिः च ऋषिपालकः ऋषिवादितिक अधीशौ, तथा ईश्वर महेश्वरौ भूतवादितिक अधीशौ. ॥ ७४ ॥

अर्थः—वळी ऋषि अने ऋषिपालकनामना ऋषिवादितोना बे इंद्रो, तथा ईश्वर अने महेश्वरनामना भूतवादितोना बे इन्द्रो आव्या.

सुवत्सकविशालाख्यौ क्रन्दितानां सुरेश्वरौ । महाक्रन्दितिकाशक्रौ हासो हासरतिस्तथा ॥ ७५ ॥

अन्वयः—सुवत्सक विशाल आख्यौ क्रंदितानां सुरेश्वरौ, तथा हासः, हासरतिः महाक्रंदितिका शक्रौ. ॥ ७५ ॥

अर्थः—वळी सुवत्सक तथा विशालनामना क्रंदितोना बे इन्द्रो, तथा हास अने हासरतिनामना महाक्रंदितोना बे इन्द्रो आव्या.

ख्यातौ श्वेतमहाश्वेतौ कूष्माण्डानां पुरन्दरौ । पावकः पावकगतिः पावकानां बिडौजसौ ॥ ७६ ॥

अन्वयः—श्वेत महाश्वेतौ ख्यातौ कूष्मांडानां पुरंदरौ, पावकः पावकगतिः पावकानां बिडौजसौ. ॥ ७६ ॥

अर्थः—वळी श्वेत अने महाश्वेतनामना कुष्मांडोना बे इन्द्रो, तथा पावक अने पावकगतिनामना पावकोना पण बे इन्द्रो आव्या.

ज्योतिषां वासवौ संख्यातीतौ रविहिमच्छवी । चतुःषष्टिरितीन्द्राणां मेरुमूर्ध्नि तदाऽऽययौ ॥ ७७ ॥

अन्वयः—ज्योतिषां रवि हिमच्छवी वासवौ संख्या अतीतौ, इति इन्द्राणां चतुःषष्टिः तदा मेरुमूर्ध्नि आययौ. ॥ ७७ ॥

अर्थः—वळी ज्योतिषीओना सूर्य अने चंद्रनामना असंख्याता इन्द्रो आव्या. एवीरीते ( सर्व मळी ) चोसठ इन्द्रो ते वखते मेरुपर्वतना शिखरपर आव्या. ॥ ७७ ॥

आदिष्टा अच्युतेन्द्रेणोपक्रम्येशानदिश्यथ । वैक्रियेण समुद्घातेनाकृष्योत्तमपुद्गलान् ॥ ७८ ॥

योजनोरुमुखान्हैमान् राजतान् रत्नजानपि । स्वर्णरौप्यमणिस्वर्णमणिरौप्यमयानपि ॥ ७९ ॥

स्वर्णरौप्यमणीन्क्लृप्तान्कलशान्मृन्मयानपि । प्रत्येकं चक्रुरष्टाग्रं सहस्रं सुरकिंकराः ॥८०॥त्रिभिर्विशेषकम्॥

अन्वयः—अथ अच्युत इन्द्रेण आदिष्टाः सुर किंकराः ईशान दिशि वैक्रियेण समुद्घातेन उपक्रम्य उत्तम पुद्गलान् आकृष्य, योजन उरु मुखान् हैमान्, राजतान्, रत्नजान्, अपि स्वर्णरौप्य, मणिस्वर्ण, मणिरौप्यमयान्, अपि स्वर्णरौप्यमणीन्, मृन्मयान् अपि क्लृप्तान्, प्रत्येकं अष्टाग्रं सहस्रं कलशान् चक्रुः ॥ ७८ ॥ ७९ ॥ ८० ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी अच्युत इन्द्रे आज्ञा करेला, एवा नोकररूप देवोए ईशान दिशामां वैक्रिय समुद्घातवडे जइने, तथा उत्तम उत्तम पुद्गलोने खेंची लावीने, एक जोजनजेवडां मनोहर मुखवाळा, सुवर्णना, रूपाना, रत्नोना, तथा सोनारूपाना, मणिस्वर्णना, मणिरूपाना, सोनारूपामणिना, तथा माटीना बनावेला, एम ते दरेक जातना एक हजार आठ कळशो बनाव्या. ॥७८॥७९॥८०॥

ते पात्रीपुष्पचङ्गेरीस्थालभृङ्गारदर्पणान् । तद्वद्रत्नकरण्डांश्च सुप्रतिष्ठान्व्यकुर्वत ॥ ८१ ॥

अन्वयः–तद्वत् ते सुप्रतिष्ठान् पात्री पुष्प चंगेरी स्थाल भृंगार दर्पणान्, च रत्न करंडान् व्यकुर्वत. ॥ ८१ ॥

अर्थः–वळी एवीज रीते तेओए उत्तम प्रकारे स्थापन करेलां थाळीओ (छाबडीओ) फुलदानीओ, थाळो, झारीओ, आरीसा तथा रत्नोना करंडीआ विकुर्व्या. ॥ ८१ ॥

क्षीराब्धिपुष्कराब्धिभ्यां तदा पद्महृदादपि । भरतैरवतक्षेत्रमुख्यात्तीर्थव्रजादपि ॥ ८२ ॥

आनिन्यिरे सदम्भोजमम्भो मृद्वन्धुरं सुराः । पुष्पसिद्धार्थतुवरौषधीः क्षुद्रहिमाद्रितः ॥ ८३ ॥युग्मम्॥

अन्वयः—तदा सुराः क्षीराब्धि पुष्कराब्धिभ्यां, अपि पद्महृदात्, भरत ऐरवत क्षेत्र मुख्यात् तीर्थ व्रजात् अपि, सदंभोजं, बंधुरं अंभः, मृद्, क्षुद्र हिमाद्रितः पुष्प सिद्धार्थ तुवर औषधीः आनिन्यिरे. ॥ ८२ ॥ ८३ ॥ युग्मं ॥

अर्थः—वळी ते वखते ते देवो क्षीरसमुद्र तथा पुष्कर समुद्रमांथी, अने पद्मसरोवरमांथी, तेमज भरत तथा ऐरवतक्षेत्रनां मुख्य-मुख्य तीर्थोना समूहमांथी उत्तम कमलो, मनोहर जल, माटी, अने क्षुद्रहिमवंतनामना पर्वतमांथी पुष्पो, सरसव तथा तुवर नामनी औषधिओ लाव्या. ॥ ८२ ॥ ८३ ॥ युग्मं ॥

**तेऽत्र सौमनसाद्भद्रशालान्नन्दनकाननात् । पाण्डुकाद्गन्धवस्तूनि नीत्वाम्भसि निचिक्षिपुः ॥ ८४ ॥**

अन्वयः—ते सौमनसात्, भद्रशालात्, नंदन काननात्, पांडुकात् गंध वस्तूनि अत्र नीत्वा अंभसि निचिक्षिपुः. ॥ ८४ ॥

अर्थः—वळी तेओए सौमनस, भद्रशाळ, नंदनवन तथा पांडुकवनमांथी सुगंधि द्रव्योने त्यां लावीने ते जलनी अंदर नाखी.

**मल्लिकापाटलाजातियूथिकाचम्पकोद्भवैः । मन्दारपारिजातोत्थैः पुष्पैः स्वर्णाम्बुजैरपि ॥ ८५ ॥**

**उत्क्षिप्तागुरुकर्पूरः स्तुतिं तन्वन्प्रभोः पुरः । अच्युतेन्द्रः सुरैः साकममुञ्चत्कुसुमाञ्जलिम् ॥ ८६ ॥**

अन्वयः—मल्लिका पाटला जाति यूथिका चंपक उद्भवैः मंदार पारिजात उत्थैः पुष्पैः, अपि स्वर्ण अंबुजैः, ॥ ८५ ॥ उत्क्षिप्त अगुरु कर्पूरः, अच्युत इन्द्रः, प्रभोः पुरः स्तुतिं तन्वन् सुरैः साकं कुसुम अंजलिं अमुंचत्. ॥ ८६ ॥ युग्मं ॥

अर्थः—पछी मालती, गुलाब, जाइ, जुइ, तथा चंपानां वृक्षोथी उत्पन्न थयेलां, तेमज मंदार. अने पारिजातनां पुष्पोवडे, अने

सोनेरी कमलोवडे, ॥८५॥ अगर कपूरनो धूप करवापूर्वक अच्युतेंद्रे प्रभुनी पासे स्तुति भणतां थकां देवोनी साथे कुसुमांजलि मूकी.

ततेषु विततेषूच्चैर्घनेषु शुषिरेष्वपि । वाद्यमानेषु वाद्येषु सर्वतोऽप्याभियोगिकैः ॥ ८७ ॥

गीयमानेषु गीतेषु तारनादेन किन्नरैः । तन्यमानेषु नृत्येषु यथातालं सुरीजनैः ॥ ८८ ॥

पठ्यमाने जिनाधीशे सुरमङ्गलपाठकैः । सितेषूद्धूयमानेषु चामरेषु सुरासुरैः ॥ ८९ ॥

जय द्वादशतीर्थेश श्रीमन्निर्जितसंसृते । इत्यादिस्तुतिवाक्येषु चारणश्रमणेषु च ॥ ९० ॥

धूपितार्चितभृङ्गारन्यस्तैः सर्वौषधीयुतैः । नीरैर्घुसृणकर्पूरश्रीखण्डागुरुसुन्दरैः ॥ ९१ ॥

स्नात्रं श्रेयःश्रियां पात्रममात्रप्रमदैः प्रभोः । त्रिषष्ट्या विदधे शक्रैरच्युतेन्द्रपुरःसरैः ॥ ९२ ॥

अन्वयः–ततेषु, घनेषु, शुषिरेषु अपि उच्चैः विततेषु वाद्येषु सर्वतः अपि आभियोगिकैः वाद्यमानेषु, ॥ ८७ ॥ किन्नरैः तार नादेन गीतेषु गीयमानेषु, सुरी जनैः यथा तालं नृत्येषु तन्यमानेषु, ॥८८॥ सुर मंगल पाठकैः जिन अधीशे पठ्यमाने, सुर असुरैः सितेषु चामरेषु उध्धूयमानेषु, ॥ ८९ ॥ च (हे) द्वादश तीर्थेश ! (हे) श्रीमन् ! (हे) निर्जित संसृते ! जय ? इत्यादि स्तुति वाक्येषु चारण श्रमणेषु, ॥९०॥ धूपित अर्चित भृंगार न्यस्तैः, सर्व औषधी युतैः, घुसृण कर्पूर श्रीखंड अगुरु सुंदरैः नीरैः, ॥९१॥ अमात्र प्रमदैः, अच्युत इंद्र पुरः सरैः त्रिषष्ट्या शक्रैः श्रेयः श्रियां पात्रं प्रभोः स्नात्रं विदधे. ॥ ९२ ॥ षड्भिः कुलकं ॥

अर्थः-वीणाआदि ततवाजित्रो, कांसीआदिक धनवाजित्रो, अने वांसली आदिक शुषिरवाजित्रो, म्होटा विस्तारथी चारेतरफथी आभियोगिकदेवो वगाडते छते, ॥८७॥ किन्नारो मनोहर स्वरथी गायनो गाते छते, देवांगनाओ तालपूर्वक नृत्य करते छते, ८८ मंगलपाठक देवो जिनेश्वरप्रभुना ( गुणोनी ) बिरुदावली बोलते छते, देवो तथा दानवो श्वेत चामरो वींझते छते, ॥ ८९ ॥ तथा हे ! बारमा तीर्थंकर !, हे ! मोक्षरूपी लक्ष्मीवाळा !, हे ! संसारने जीतनारा ! तमो जय पामो ? इत्यादिक स्तुतिनां वचनो चारण मुनिओ बोलते छते, ॥९०॥ धूपेला तथा पूजेला कलशोमां स्थापन करेलां, सर्व औषधिओथी मिश्रित करेलां, तथा केसर, कपूर, चंदन अने अगुरुथी मनोहर थयेलां जलवडे करीने, ॥ ९१ ॥ अत्यंत खुशी थयेला एवा अच्युत आदिक ( बीजा ) त्रेसठ इंद्रोए कल्याणकारी मोक्षलक्ष्मीना स्थानसरखो प्रभुनो स्नात्रमहोत्सव कर्यो. ॥ ९२ ॥ षड्भिः कुलकं ॥

**मार्जितं गन्धकाषाय्या कर्पूरागुरुधूपितम् । व्यलिम्पन्पात्रिकान्यस्तैः प्रभुं गोशीर्षचन्दनैः ॥ ९३ ॥**

अन्वयः—गंधकाषाय्या मार्जितं, कर्पूर अगुरु धूपितं प्रभुं पात्रिकान्यस्तैः गोशीर्ष चंदनैः व्यलिंपन्. ॥ ९३ ॥

अर्थः-(पछी ते इंद्रोए) गंधकाषाय्य नामना वस्त्रथी लुंछेला शरीरवाळा, तथा कर्पूर अने अगुरुथी धूपेला, एवा प्रभुने थाळीमां स्थापन करेलां गोशीर्ष चंदनोवडे विलेपन कर्युं. ॥९३॥

**भविष्यत्यधुना भर्तुरङ्गसंग इति स्मितैः । भृङ्गगीतिपरैर्देवाः प्रभुं पुष्पैरपूजयन् ॥ ९४ ॥**

अन्वयः-अधुना भर्तुः अंग संगः भविष्यति, इति स्मितैः, भृंग गीति परैः पुष्पैः देवाः प्रभुं अपूजयन्. ॥ ९४ ॥

स किंचिदपसृत्याथ ज्वलद्दीपदलत्तमः । ऊर्ध्वीभूतः पुरो भर्तुराराद़ारात्रिकं दधौ ॥ १ ॥

अन्वयः–अथ ऊर्ध्वीभूतः सः किंचित् अपसृत्य भर्तुः पुरः ज्वलत् दीप दलत्तमः आरात्रिकं दधौ. ॥ १ ॥

अर्थः—पछी ते इन्द्र उभो थइने, तथा कंइक पाछळ हठीने प्रभुनी सन्मुख जाज्वल्यमान दीपकथी नष्ट थतुं छे अंधकार जेथी एवी आरती उतारवा लाग्यो. ॥ १ ॥

तज्जिनेन्दोः पुरः स्फारलुठत्तारमिवाथ सः । क्षिप्तपुष्पं द्युसद्वारैस्त्रिवारमुदतारयत् ॥ २ ॥

अन्वयः–सः स्फार लुठत्तारं इव द्युसद्वारैः क्षिप्त पुष्पं तत् जिनेंदोः पुरः त्रिवारं उदतारयत्. ॥ २ ॥

अर्थः—एरीते ते इन्द्रे, जाणे विस्तारपूर्वक त्यां ताराओ आवीने विखराता होय नही! एरीते देवोना समूहोए फेंकेलां छे पुष्पो जेनापर, एवी ते आरतीने प्रभुनी आगळ त्रणवार उतारी. ॥ २ ॥

इलातलमिलन्मौलिः स पौलोमीपतिस्ततः । विनम्य विष्टपाधीशं प्रहृष्ट इति तुष्टुवे ॥ ३ ॥

अन्वयः–ततः सः पौलोमी पतिः, इला तल मिलत् मौलिः विष्टप अधीशं विनम्य प्रहृष्टः इति तुष्टुवे. ॥ ३ ॥

अर्थः—पछी ते इन्द्र पृथ्वीतलपर (पोतानुं) मस्तक नमावीने, तथा जगतना नाथ एवा ते प्रभुने नमीने आनंदथी नीचेमुजब स्तुति करवा लाग्यो. ॥ ३ ॥

जय त्रिभुवनाश्चर्य जय त्रिभुवनाभय । जय त्रिभुवनानन्द जय त्रिभुवनोदय ॥ ४ ॥

अन्वयः–(हे) त्रिभुवन आश्चर्य ! जय ? (हे) त्रिभुवन अभय ! जय ? (हे) त्रिभुवन आनंद ! जय ? (हे) त्रिभुवन उदय ! जय ?

अर्थः–हे त्रणे भुवनोने आश्चर्यरूप ! तमो जय पामो ? हे त्रणे भुवनोने अभयरूप ! तमो जय पामो ? हे त्रणे जगतने आनंदरूप ! तमो जय पामो ? हे त्रणे भुवनोना उदयरूप ! तमो जय पामो ? ॥ ४ ॥

सद्यो मयाद्यरेखाद्य प्रपेदे भाग्यभूरिषु । यत्त्वं त्रिविष्टपीतत्त्वं ददृशे द्वादशो जिनः ॥ ५ ॥

अन्वयः–अद्य मया सद्यः भाग्यभूरिषु आद्य रेखा प्रपेदे, यत् त्रिविष्टपी तत्त्वं त्वं द्वादशो जिनः ददृशे. ॥ ५ ॥

अर्थः–आजे में अचानक अति भाग्यवंतोमां पेहेलो नंबर मेळव्यो छे, केमके त्रणे जगतना सारभूत एवा आपरूपी बारमा तीर्थकरनुं मने दर्शन थयुं छे. ॥ ५ ॥

अणुमानं मनस्तद्भूर्बुद्धिस्तत्संभवं वचः । क्व तेन त्वद्गुणा नाथ स्तुत्या विश्वविलङ्घिनः ॥ ६ ॥

अर्थः–भ्रुकुटिरूपी शिरीषना ( सरसवना पुष्पोना ) स्फुरायमान हारवालुं ( धारवालुं ) कामराजानुं जाणे चंपाना पुष्पनुं बनेलुं अर्धचंद्रनामनुं बाण होय नही ! तेम जेणीना ललाटमां सेंथानो दंड (लींटो) शोभतो हतो. ॥ ५५ ॥

**दृग्विश्वासमृगाश्लिष्टौ धर्तुं युवमनोमृगान् । यत्कर्णौ मृगयापाशौ कामयौवनयोरिव ॥ ५६ ॥**

अन्वयः–दृग् विश्वास मृग आश्लिष्टौ यत्कर्णौ युव मनः मृगान् धर्तुं काम यौवनयोः मृग पाशौ इव. ॥ ५६ ॥

अर्थः–आंखोरूपी विश्वासु हरिणोथी आलिंगित थयेला जेणीना कर्णो युवानोना मनरूपी हरिणोने पकडवामाटे कामदेव तथा यौवनना मृगपाशोसरखा जणाय छे. ॥ ५६ ॥

**कामकान्ताद्वयक्रीडासरसीसदृशोर्दृशोः । भातः पालीवनालीव यद्भ्रुवौ भुग्नमेचके ॥ ॥ ५७ ॥**

अन्वयः—भुग्न मेचके यद् भ्रुवौ काम कांता द्वय क्रीडा सरसी सदृशोः दृशोः पाली वन आली इव भातः. ॥ ५७ ॥

अर्थः–वांकी वळेली श्याम रंगनी जेणीनी बन्ने भ्रुकुटिओ कामदेवनी (रति अने प्रीतिनामनी) बन्ने स्त्रीओनी क्रीडा करवानी तलावडी सरखी बन्ने आंखोना किनारापर बगीचानी हारपेठे शोभे छे. ॥ ५७ ॥

**रेजतुर्मञ्जुलज्योतिर्द्वाराचारेण तद्दृशौ । प्रणाल्याविव शृङ्गारविलासरसपूरयोः ॥ ५८ ॥**

अन्वयः—मंजुल ज्योतिः द्वार आचारेण तद्दृशौ शृंगार विलास रसपूरयोः प्रणाल्यौ इव रेजतुः. ॥ ५८ ॥

अर्थ—मनोहर कांतिना द्वाररूपे रहेली तेणीनी बन्ने आंखो शृंगार अने विलास रसना प्रवाहोनी नेहेरोसरखी शोभे छे.

**कपोलयो रतिप्रीतिक्रीडाकुट्टिमयोरिव । यस्या नासा वहत्यन्तःसीमाभित्तिसमानताम् ॥ ५९ ॥**

अन्वयः—यस्याः नासा रति प्रीति क्रीडा कुट्टिमयोः इव कपोलयोः अंतः सीमा भित्ति समानतां वहति ॥ ५९ ॥

अर्थः—जेणीनी नासिका, रति अने प्रीतिना क्रीडा करवाना मेदान सरखा बन्ने गालोनी वच्चे सीमारूप उभेली भींतनी समानताने धारण करे छे, (भींतजेवी देखाय छे.) ॥ ५९ ॥

**कपोलयुगलं यस्या राजते राजमञ्जुलम् । विश्वदृग्वाहवाह्यालिवलयद्वयविभ्रमम् ॥ ६० ॥**

अन्वयः–राजमंजुलं, विश्व दृग् वाह वाह्य आलि वलय द्वय विभ्रमं यस्याः कपोल युगलं राजते. ॥ ६० ॥

अर्थः—चंद्रसरखी उज्ज्वल, तथा जगतनी दृष्टिरूपी घोडेस्वारोनी श्रेणिओने खेलवाना बे कुंडालां सरखी जेणीना गालनी जोडी शोभी रही छे. ॥ ६० ॥

**वहत्योष्ठयुगं यस्या द्युतिविद्रुतविद्रुमम् । नवीनोद्भिन्नरागद्रुपल्लवद्वयतुल्यताम् ॥ ६१ ॥**

अन्वयः–द्युति विद्रुत विद्रुमं यस्याः ओष्ठयुगं नवीन उद्भिन्न राग द्रु पल्लव द्वय तुल्यतां वहति. ॥ ६१ ॥

अर्थः—कांतिथी तिरस्कार करेल छे परवालांनो जेणे, एवा जेणीना बन्ने होठो, नवा उत्पन्न थयेला रागरूपी वृक्षना बे कुंपलीयांओनी तुल्यताने धारण करे छे. ॥ ६१ ॥

भ्रेजेऽनुमीयमानाया विपञ्चीमधुरस्वरैः । मुक्तावलीव भारत्या यन्मुखे दशनावलिः ॥ ६२ ॥

अन्वयः-विपंची मधुर स्वरैः अनुमीयमानायाः भारत्याः मुक्ता आवली इव यन्मुखे दशन आवलिः भ्रेजे. ॥ ६२ ॥

अर्थः—वीणासरखा मधुर वचनोथी अनुमान कराती सरस्वतीनी मोतीओनी माळा जाणे होय नही ! तेम जेणीना मुखमां दांतोनी श्रेणि शोभी रहेली छे. ॥ ६२ ॥

यस्या मनसि संवासं कुरुते कुसुमायुधः । इतीवाद्भुतसौरभ्यचारुः श्वसितमारुतः ॥ ६३ ॥

अन्वयः-मनसि कुसुम आयुधः संवासं कुरुते, इति इव यस्याः श्वसित मारुतः अद्भुत सौरभ्य चारुः. ॥ ६३ ॥

अर्थः-(तेणीना) हृदयमां पुष्पोरूपी शस्त्रोवाळो कामदेव (खरेखर) निवास करीने रहेलो छे, एवुं जणाववाने जाणे होय नही ! तेम जेणीना श्वासोश्वासनो वायु आश्चर्यकारक सुगंधिथी मनोहर थयेलो छे. ॥ ६३ ॥

वीज्यमानस्य विश्वेन लोचनाञ्चलचामरैः । यत्कण्ठो मुखराजस्य वेत्रासनमिवेक्ष्यते ॥ ६४ ॥

अन्वयः—विश्वेन लोचन अंचल चामरैः वीज्यमानस्य मुखराजस्य वेत्र आसनं इव यत्कंठः ईक्ष्यते. ॥ ६४ ॥

अर्थः-जगतवडे करीने चक्षुओना छेडाओरूपी चामरोवडे वींझाता एवा ( तेणीना ) मुखरूपी राजाने ( बेसवानी ) नेतरनी बनावेली जाणे खुरशी होय नही ! तेम जेणीनो कंठ देखाय छे. ॥ ६४ ॥

प्रवर्धमानयोर्यस्याः प्रकामं कर्णपाशयोः । स्थानं दातुमिवाभूतामंसौ किंचिन्नताकृती ॥ ६५ ॥

अन्वयः-यस्याः प्रकामं प्रवर्धमानयोः कर्ण पाशयोः स्थानं दातुं इव अंसौ किंचित् नताकृती अभूतां. ॥ ६५ ॥

अर्थः—जेणीना सहज वधता कर्णोरूपी पाशोने जाणे स्थान आपवामाटे होय नही ! तेम ( तेना ) बन्ने खभाओ कंइंक नमेला आकारवाळा थया छे. ॥ ६५ ॥

**यद्बाहुलतयोर्लोलदङ्गुलीपल्लवश्रियोः । नखांशुपुष्पयोः कश्चित्पुण्यात्मा लप्स्यते फलम् ॥ ६६ ॥**

अन्वयः-लोलत् अंगुली पल्लव श्रियोः, नख अंशु पुष्पयोः यद् बाहु लतयोः फलं कश्चित् पुण्यात्मा लप्स्यते. ॥ ६६ ॥

अर्थः-झुलती आंगळीओरूपी कुंपलोनी शोभावाळी, तथा नखोना किरणोरूपी पुष्पोवाळी एवी जेणीनी भुजाओरूपी बन्ने लताओनुं फल तो कोइक पुण्यशाली पुरुष मेळवी शकशे. ॥ ६६ ॥

**यदुरःस्थायिनः कामभूपस्योपायनीकृतम् । यौवनेनेव वक्षोजबीजपूरफलद्वयम् ॥ ६७ ॥**

अन्वयः-यत् उरः स्थायिनः कामभूपस्य, वक्षोज बीजपूर फल द्वयं यौवनेन उपायनी कृतं इव. ॥ ६७ ॥

अर्थः—जेणीना हृदयमां बिराजेला कामदेवरूपी राजाने, स्तनोरूपी बीजोरांनां बे फलो यौवनवये जाणे भेट धर्यां होय नही ! ( तेम शोभे छे. ) ॥ ६७ ॥

**अतीव कृशतां बिभ्रच्छुभ्रप्रतिपदिन्दुवत् । यन्मध्यदेशो लोकेन श्रुत एव न वीक्षितः ॥ ६८ ॥**

अन्वयः-शुभ्र प्रतिपत् इंदुवत् अतीव कृशतां बिभ्रत् यत् मध्य देशः लोकेन श्रुतः एव, वीक्षितः न. ॥ ६८ ॥

अर्थः—शुक्लपक्षना पडवाना चंद्रनीपेठे अत्यंत पातळापणाने धारण करनारो, एवो जेणीनो मध्यभाग लोकोए सांभळयोज छे, परंतु नजरे जोएलो नथी. ॥ ६८ ॥

**रतिप्रीतिस्मरैर्गन्तुं यन्मध्याध्वनि संकटे । हस्तालम्बनदण्डाभं सज्जीचक्रे वलित्रयम् ॥ ६९ ॥**

अन्वयः—संकटे यत् मध्य अध्वनि गंतुं रति प्रीति स्मरैः हस्त आलंबन दंड आभं वलित्रयं सज्जीचक्रे. ॥ ६९ ॥

अर्थः–जेणीना सांकडा मध्यभागना मार्गमां जवामाटे रति, प्रीति तथा कामदेवे (जाणेपोताना) हाथने टेकाववानी लाकडीओ-सरखी त्रण रेखाओने तैयार करेली छे. ॥ ६९ ॥

**रक्षादक्षफणिप्रख्यलक्ष्यरोमालिशालिनी । यस्या लावण्यपीयूषकुण्डाभा नाभिराबभौ॥ ७० ॥**

अन्वयः–रक्षा दक्ष फणि प्रख्य लक्ष्य रोम आलि शालिनी, यस्याः नाभिः लावण्य पीयूष कुंड आभा आबभौ. ॥ ७० ॥

अर्थः—रक्षण करवामां कुशल सर्पो सरखी प्रत्यक्ष देखाती वाळोनी श्रेणिथी शोभती, एवी जेणीनी नाभि, लावण्यरूपी अमृतना कुंडसरखी शोभे छे. ॥ ७० ॥

**मनोभूमत्तमातङ्गवेगप्रसरसैकतम् । राजते जघनं यस्या रोमालिमदरेखया ॥ ७१ ॥**

अन्वयः–मनोभू मत्त मातंग वेग प्रसर सैकतं, यस्याः जघनं रोम आलि मद रेखया राजते. ॥ ७१ ॥

अर्थः—कामदेवरूपी मदोन्मत हाथीने वेगथी क्रीडा करवाना रेताळ मेदानसरखुं जेणीनुं जघनस्थळ रोमोनी श्रेणिरूपी (झरता)

मदनी रेखाथी शोभी रहेलुं छे. ॥ ७१ ॥

यस्याः किं वर्ण्यते तन्व्या नितम्बस्तम्बडम्बरः । यस्मादाविर्भवत्युच्चैः स्फारः शृङ्गारभूरुहः ॥ ७२ ॥

अन्वयः–तन्व्याः यस्याः नितंब स्तंब डंबरः किं वर्ण्यते ! यस्मात् स्फारः शृंगार भूरुहः उच्चैः आविर्भवति. ॥ ७२ ॥

अर्थः–सूक्ष्म शरीरवाली एवी जेणीना नितंबरूपी जलार्द्र वनभूमिना आडंबरनुं शुं वर्णन करुं ? के जेमांथी विस्तीर्ण शृंगाररूपी वृक्ष उंचेप्रकारे प्रगट थाय छे. ॥ ७२ ॥

मकरध्वजसाम्राज्यातुल्यमङ्गल्यकारणम् । राजत्यूरुयुगं यस्या रम्भास्तम्भद्वयोपमम् ॥ ७३ ॥

अन्वयः—मकर ध्वज साम्राज्य अतुल्य मांगल्य कारणं, रंभा स्तंभ द्वय उपमं यस्याः ऊरुयुग्मं राजति. ॥७३॥

अर्थः–कामदेवना साम्राज्यना अनुपम मांगलिक अवसरना कारणभूत एवा बे केळना स्तंभोसरखा जेणीना बन्ने साथळो शोभे छे.

यस्या जङ्घे मिथो वीक्ष्य मन्यमाने स्वमद्भुतम् । हर्षेण हसतः कूजन्मुक्तामञ्जीरकान्तिभिः ॥ ७४ ॥

अन्वयः—स्वं अद्भुतं मन्यमाने यस्याः जंघे मिथः वीक्ष्य हर्षेण कूजत् मुक्ता मंजीर कांतिभिः हसतः. ॥ ७४ ॥

अर्थः–पोताने अद्भुत मानती एवी जेणीनी बन्ने जंघाओ परस्पर एकबीजाने जोइने नाद करता मोतीओना झांझरोनी कांतिथी हर्षपूर्वक हस्या करे छे. ॥ ७४ ॥

किंचित्कूर्मोन्नतौ यस्याश्चरणौ वरलागतेः । मुखेन्दुभयतः पद्मे बद्धकोशे इव स्थिते ॥ ७५ ॥

अन्वयः–वरला गतेः यस्याः किंचित् कूर्म उन्नतौ चरणौ, मुख इंदु भयतः बद्ध कोशे पद्मे इव स्थिते. ॥ ७५ ॥
अर्थः—हंससरखी गतिवाळी एवी जेणीना काचबानीपेठे कंइंक उंचा पगो, मुखरूपी चंद्रना भयथी बीडाइ गयेला कमलना बे पोटाओनीपेठे शोभी रह्या छे. ॥ ७५ ॥

लीलाधःकृतजेतव्यकिङ्किल्लिकिसलद्युती । द्योतेते यत्क्रमौ बद्धमाणिक्यमुकुटौ नखैः ॥ ७६ ॥

अन्वयः–लीला अधः कृत जेतव्य किंकिल्लि किसल द्युती यत्क्रमौ नखैः बद्ध माणिक्य मुकुटौ द्योतेते. ॥ ७६ ॥
अर्थः–क्रीडाथी तिरस्कारेल छे जीतवालायक अशोकवृक्षना नवपल्लवोनी कांति जेओए, एवा जेणीना बन्ने चरणो नखोवडे करीने (जाणे) पहेरेल छे माणिक्यना मुकुटो जेओए एवा शोभे छे. ॥ ७६ ॥

याग्रहीज्जितयोर्यानशोभया कुम्भिहंसयोः । कुचाभ्यां कुम्भसौभाग्यं नूपुराभ्यां रवश्रियम् ॥ ७७ ॥

अन्वयः–यान शोभया जितयोः कुंभि हंसयोः कुचाभ्यां कुंभ सौभाग्यं, नूपुराभ्यां रव श्रियं या अग्रहीत्. ॥ ७७ ॥
अर्थः—गतिनी शोभाथी हाथी अने हंसने जीतवाथी, स्तनोवडे (हाथीना) बे गंडस्थलोना सौभाग्यने, तथा झांझरोवडे (हंसनी) ध्वनिनी शोभाने तेणीए खुंचवी लीधी छे. ॥ ७७ ॥

जितं त्रिभुवनस्त्रैणमनयेति स्मरो नृपः । जैत्रपत्रं ददौ यस्याः कबरीदण्डदंम्भतः ॥७८॥

अन्वयः–अनया त्रिभुवन स्त्रैणं जितं, इति स्मरः नृपः कबरी दंड दंभतः यस्याः जैत्रपत्रं ददौ. ॥ ७८ ॥

अर्थः—आ कन्याये त्रणे जगतनी स्त्रीओने जीती छे, एम मानीने कामराजाए वेणिदंडना मिषथी जेणीने विजयपताका आपेली छे.

**सा कृतस्फारशृङ्गारा शृङ्गाररसजीवितम् । कदाचित्पितुरुत्सङ्गमङ्गीचक्रे सभाजुषः ॥ ७९ ॥**

अन्वयः—कृत स्फार शृंगारा, शृंगार रस जीवितं सा, कदाचित् सभाजुषः पितुः उत्संगं अंगीचक्रे. ॥ ७९ ॥

अर्थः—करेल छे विस्तीर्ण शृंगार जेणीए एवी, तथा शृंगाररसना जीवनरूप एवी ते राजकुमारी एक दिवसे सभामां बेठेला (पोताना) पिताना खोळामां बेठी हती. ॥ ७९ ॥

**अस्या भविष्यति पतिः को नाम त्रिजगद्गुरुः । इति चिन्ताचयाचान्तस्वान्तो यावदभून्नृपः ॥८०॥**

**पुरा परिचितं किंचिद्विपञ्चीस्थापितस्वरम् । तावद्दिवः सभागर्भमभ्यगात्किन्नरद्वयम् ॥ ८१ ॥ युग्मम् ॥**

अन्वयः—अस्याः पतिः कः नाम त्रिजगत् गुरुः भविष्यति ? इति चिंता चय आचांत स्वांतः यावत् नृपः अभूत्, ॥ ८० ॥ तावत् पुरा परिचितं, विपंची स्थापित स्वरं किंचित् किन्नर द्वयं दिवः सभा गर्भे अभ्यगात्. ॥ ८१ ॥ युग्मं ॥

अर्थः—आ कन्यानो स्वामी त्रणे जगतनो नायक एवो कोण थशे ? एवीरीतनी चिंताना समूहथी भरेलुं छे हृदय जेनुं एवो ते राजा जेटलामां थयो, ॥ ८० ॥ तेवामां पूर्वना परिचयवाळुं, अने वीणानो नाद करतुं कोइक किन्नरनुं जोडुं आकाशमांथी (उतरीने) राजसभामां आव्युं. ॥ ८१ ॥ युग्मं ॥

**अहो आगम्यतामागम्यतां कुशलिनौ युवाम् । किं चिराभ्यागतौ भूपस्तावित्याह ससंभ्रमम् ॥ ८२ ॥**

अन्वयः-अहो! आगम्यतां? आगम्यतां? युवां कुशलिनौ? किं चिर अभ्यागतौ? इति ससंभ्रमं भूपः तौ आह. ॥ ८२ ॥

अर्थः-अहो! आवो? आवो? तमा कुशल तो छो ने? केम बहु समये आव्या? एरीते संभ्रमथी राजाए तेओने कह्युं. ॥८२॥

तावूचतुश्चतुःसिन्धुपूतभूतलभूषणः । लोकोत्तरगुणग्रामो विश्वव्यामोहमोहनः ॥ ८३ ॥
रूपश्रीसततहूतपुरुहूतपुरन्ध्रिदृक् । भानोः प्रभातशीताभिः प्रभाभिरिव निर्मितः ॥ ८४ ॥
गुणागुणविशेषज्ञोऽनन्यसामान्यदानकृत् । आवाभ्यां सेव्यते भूप चम्पाभूपसुतोऽधुना ॥ ८५ ॥

अन्वयः—तौ ऊचतुः, चतुः सिंधु पूत भूतल भूषणः, लोकोत्तर गुण ग्रामः, विश्व व्यामोह मोहनः, ॥ ८३ ॥ रूप श्री सतत आहूत पुरुहूत पुरंध्रि दृक्, प्रभात शीताभिः भानोः प्रभाभिः निर्मितः इव, ॥ ८४ ॥ गुण अगुण विशेषज्ञः, अनन्य सामान्य दान कृत्, चंपा भूप सुतः (हे) भूप! अधुना आवाभ्यां सेव्यते. ॥ ८५ ॥ त्रिभिर्विशेषकं ॥

अर्थः-त्यारे ते बन्ने किन्नरोए कह्युं के, चारे महासागरोथी पवित्र थयेलां पृथ्वीतलने शोभावनारा, अलौकिक गुणोना समूहवाळा, जगतने मोह उत्पन्न करनारा, ॥ ८३ ॥ रूपनी शोभाथी हमेशां आकर्षेल छे इन्द्रनी इन्द्राणीओनां चक्षुओ जेणे एवा, अने प्रभातसमयनी शीतल सूर्यनी कांतिथी जाणे बनावेला होय नही! एवा, ॥ ८४ ॥ गुण अवगुणोना तफावतने जाणनारा, बीजाओथी असाधारण दान आपनारा, एवा चंपानगरीना राजाना पुत्रने हे राजन्! हालमां अमो सेवीये छीये. ॥ ८५ ॥

गेयः स एव तस्याग्र एवेदृग्निश्चयश्च नौ । किं याति वारिजातेषु पारिजातमधुव्रतः ॥ ८६ ॥

अन्वयः–तस्य अग्रे एव सः एव गेयः, ईदृग् नौ निश्चयः, पारिजात मधुव्रतः किं वारि जातेषु याति. ॥ ८६ ॥

अर्थः—तेमनीज पासे रहीने तेमनाज गुणगान गावा, एवो अमारो बन्नेनो निश्चय थयेलो छे, केमके कल्पवृक्षनो भमरो शुं कमलोपर जाय छे ? ॥ ८६ ॥

**चिरं परिचयोत्कर्षवशंवदहृदौ पुनः । भवन्तमन्तःकरणप्रीत्यैव दृष्टुमागतौ ॥ ८७ ॥**

अन्वयः—पुनः चिरं परिचय उत्कर्ष वशंवद हृदौ, अंतःकरण प्रीत्या एव भवंतं दृष्टुं आगतौ. ॥ ८७ ॥

अर्थः—वळी घणा काळना परिचयना उभराने लीधे वशीभूत थयेल हृदयवाळा अमो, फक्त हृदयना प्रेमथीज आपनुं दर्शन करवाने आव्या छीये. ॥ ८७ ॥

**अथ भूपोऽभ्यधाद् गेयं यदि तस्याग्र एव वाम् । क्व तन्मे कर्णयोर्युष्मद्गीतपीयूषपारणम् ॥ ८८ ॥**

अन्वयः–अथ भूपः अभ्यधात्, यदि तस्य अग्रे एव वां गेयं, तत् युष्मद् गीत पीयूष पारणं मे क्व ? ॥ ८८ ॥

अर्थः—पछी राजाए कह्युं के, ज्यारे तेनीज पासे तमारे गावानुं छे, तो तमारां गायनरूपी अमृतनुं पारणुं मने हवे क्यांथी थइ शके ? ॥ ८८ ॥

**अवोचतां च तौ भक्त्याभ्यर्थिताप्सरसां वरा । चित्रलेखा पटे न्यस्य प्रभो रूपमदत्त नौ ॥ ८९ ॥**

अन्वयः–च तौ अवोचतां, भक्त्या अभ्यर्थिता अप्सरसां वरा चित्रलेखा प्रभोः रूपं पटे न्यस्य नौ अदत्त. ॥ ८९ ॥

अर्थः—पछी ते बन्ने किन्नरो बोल्या के, भक्तिपूर्वक प्रार्थना करवाथी चित्रलेखानामनी उत्तम अप्सराए ते प्रभुनुं रूप पट्टपर चीतरीने अमोने आपेलुं छे. ॥ ८९ ॥

वहावहे सहावां तद्विश्वस्वैरविहारिणौ । गायावो यत्र तत्रापि तत्पुरस्कृत्य कौतुकात् ॥ ९० ॥

अन्वयः-विश्व स्वैर विहारिणौ आवां तत् सह वहावहे, यत्र तत्र अपि कौतुकात् तत् पुरस्कृत्य गायावः. ॥ ९० ॥

अर्थः—जगतमां इच्छामुजब विचरनारा एवा अमो बन्ने ते छबीने साथेज राखीये छीये, अने ज्यां जइये छीये त्यां कौतुकथी ते छबीने आगळ धरीनेज अमो गाये छीये. ॥ ९० ॥

तत्तेऽस्मद्गीतशुश्रूषा यदि पीठं विमुञ्च तत् । इहारोपय भूपाल रूपचित्रपटं विभोः ॥ ९१ ॥

अन्वयः-तत् हे भूपाल ! यदि ते अस्मद् गीत शुश्रूषा, तत् पीठं विमुंच ? इह विभोः रूप चित्र पटं आरोपय ? ॥ ९१ ॥

अर्थः-माटे हे राजन् ! जो तमोने अमारुं गायन सांभळवानी इच्छा होय, तो तमो आ सिंहासन त्यजी दीयो ? अने ते सिंहासनपर ते प्रभुना आ चित्रपटने स्थापन करो ? ॥ ९१ ॥

इत्युक्ते कौतुकी भूपः प्रभुरूपनिरूपणे । भद्रासनपरीहारमेवोत्तरमदत्त सः ॥ ९२ ॥

अन्वयः—इति उक्ते प्रभु रूप निरूपणे कौतुकी सः भूपः भद्रासन परीहारं एव उत्तरं अदत्त. ॥ ९२ ॥

अर्थः-ते किन्नरोए एम कहेवाथी प्रभुनी छबी जोवा माटे उत्सुक थयेला ते राजाए सिंहासनने त्याग करवारूपज तेमने प्रत्यु-

तर आप्यो. (अर्थात् ते सिंहासनपरथी उठी गयो.) ॥ ९२ ॥

**तौ मुदाकृष्य धम्मिल्लाद्दिव्यमाल्यार्चितं ततः। न्यस्य सिंहासने चित्रपटं भर्तुरगायताम् ॥ ९३ ॥**

अन्वयः—ततः तौ दिव्य माल्य अर्चितं भर्तुः चित्रपटं धम्मिल्लात् आकृष्य सिंहासने न्यस्य मुदा अगायतां. ॥ ९३ ॥

अर्थः—पछी तेओ दिव्य पुष्पमालाथी पूजेली प्रभुनी छबीने (पोताना) चोटलामांथी कहाडीने, तथा तेने ते सिंहासनपर स्थापीने हर्षथी गावा लाग्या. ॥ ९३ ॥

**सभासदां प्रभो रूपं पश्यतां शृण्वतां गुणान् । एहिरेयाहिरांचक्रे चित्तं चक्षुःश्रवोन्तरे ॥ ९४ ॥**

अन्वयः-प्रभोः रूपं पश्यतां, गुणान् शृण्वतां सभासदां चित्तं चक्षुः श्रवः अंतरे एहिरे याहिरां चक्रे. ॥ ९४ ॥

अर्थः—पछी ते प्रभुनुं रूप जोता, तथा गुणोने सांभळता एवा सभासदोनुं हृदय, चक्षु तथा कर्णोवच्चे आवजाव करवा लाग्युं.

**मुक्तापरेन्द्रियग्रामं स्वामिरूपदिदृक्षया । वेगादक्षिगवाक्षेऽगात्पद्मावत्या मनः पुनः ॥ ९५ ॥**

अन्वयः-पद्मावत्याः मनः पुनः मुक्त अपर इंद्रिय ग्रामं स्वामि रूप दिदृक्षया वेगात् अक्षि गवाक्षे अगात्. ॥ ९५ ॥

अर्थः—परंतु पद्मावतीनुं मन तो बीजी इंद्रियोनो व्यापार तजीने (फक्त) प्रभुनुं रूप जोवानी इच्छाथी एकदम (पोताना) चक्षुरूपी झरुखामां चाल्युं गयुं. ॥ ९५ ॥

**त्रैलोक्यकल्पनाकल्पद्रुमस्त्वमभिगीयसे । तन्मे त्वदंघ्रिदासीत्वसंकल्पं पूरय प्रभो ॥ ९६ ॥**

इति ध्यानमयाम्भोधिमध्यमज्जितमानसा । प्रभुरूपातिरेकश्रीलीननेत्रैव सा स्थिता ॥ ९७ ॥ युग्मम् ॥

अन्वयः—( हे ) प्रभो ! त्वं त्रैलोक्य कल्पना कल्पद्रुमः अभिगीयसे, तत् मे त्वत् अंघ्रि दासीत्व संकल्पं पूरय? ॥ ९६ ॥ इति ध्यानमय अंभोधि मध्य मज्जित मानसा, प्रभु रूप अतिरेक श्री लीन नेत्रा एव सा स्थिता. ॥ ९७ ॥ युग्मं ॥

अर्थः—हे प्रभु ! आप तो त्रणे लोकनी इच्छा ( पूरवामाटे ) कल्पवृक्षसमान कहेवाओ छो, माटे मारी आपना चरणोनी दासीपणानी इच्छाने ( आप ) पूर्ण करो ? ॥ एवी रीतना ध्यानरूपी महासागरमां लीन थयेलां हृदयवाळी, तथा प्रभुना रूपना अतिशयनी शोभामांज चोटेलां चित्तवाळी ते पद्मावतीतो स्थिरज थइ गइ. ॥ ९७ ॥ युग्मं ॥

कारयन्प्रभुरूपाब्धौ जलकेलिमिवाक्षिणी । लोलयन्मौलिमुर्वीन्दुरिति सभ्यांस्तदाभ्यधात् ॥ ९८ ॥

अन्वयः—प्रभु रूप अब्धौ अक्षिणी जलकेलिं कारयन् इव, मौलिं लोलयन् उर्वी इंदुः तदा सभ्यान् इति अभ्यधात्. ॥ ९८ ॥

अर्थः—प्रभुना रूपरूपी महासागरमां पोतानी बन्ने आंखोने जाणे जलक्रीडा करावतो होय नही! एम (पोतानुं) मस्तक कंपावतो एवो ते राजा ते वखते सभासदोने एम कहेवा लाग्यो के, ॥ ९८ ॥

तत्प्राच्यैः फलितं पुण्यैर्दृष्टश्चित्रेऽपि यत्प्रभुः । फलत्विदानीं तद्वीक्षापुण्यं तन्मूर्तिदर्शनात् ॥ ९९ ॥

अन्वयः—प्रभुः यत् चित्रे अपि दृष्टः, तत् प्राच्यैः पुण्यैः फलितं, इदानीं तत् मूर्ति दर्शनात् तत् वीक्षा पुण्यं फलतु ? ॥ ९९ ॥

अर्थः—आ प्रभुने जे चित्रमां पण जोया, तेथी अमारां पूर्वनां पुण्यो फल्यां छे, (एम हुं मानुं छुं.) हवे तेमनां साक्षात् दर्शनथी

तेमने जोवानुं पुण्य सफल थाओ? ॥ ९९ ॥

**इमां पुण्यद्रुमफलं ढौकनीकृत्य कन्यकाम् । श्रीवासुपूज्यं पश्यामो यामश्चम्पापुरीं द्रुतम् ॥ ५०० ॥**

अन्वयः-पुण्य द्रुम फलं इमां कन्यकां ढौकनीकृत्य श्रीवासुपूज्यं द्रुतं पश्यामः, चंपापुरीं यामः. ॥ ५०० ॥

अर्थः-पुण्यरूपी वृक्षनां फलरूप आ कन्याने भेट धरीने आपणे ते श्रीवासुपूज्यप्रभुनां दर्शन करीयें अने (ते माटे) चंपानगरीमां जइये. ॥ ५०० ॥

**अथ सभ्यैरनुमतः प्रहृष्टैर्हृष्टरोमभिः । सैन्यारब्धमहीकम्पश्चम्पायै प्राचलन्नृपः ॥ १ ॥**

अन्वयः—अथ प्रहृष्टैः हृष्ट रोमभिः सभ्यैः अनुमतः नृपः सैन्य आरब्ध मही कंपः चंपायै प्राचलत्. ॥ १ ॥

अर्थः-पछी खुशी थयेला, तथा रोमांचित थयेला सभासदोनी अनुमतिथी ते राजा सैन्यना प्रयाणथी पृथ्वीने कंपावतोथको चंपानगरीप्रते चालवा लाग्यो. ॥ १ ॥

**भवद्भ्यां चित्रलेखातश्चित्रमीदृग्विधाप्यताम् । अयं मे दीयतां दृष्टिहृत्प्राणालम्बनं पटः ॥ २ ॥**

**इत्यर्थितौ पितुश्छन्नं कन्यायै किन्नरौ पटम् । प्रदाय चित्रलेखार्थं जग्मतुर्नृपसत्कृतौ ॥ ३ ॥युग्मम्॥**

अन्वयः—भवद्भ्यां चित्रलेखातः ईदृग् चित्रं विधाप्यतां ? दृष्टिहृत्, प्राण आलंबनं अयं पटः मे दीयतां ? ॥ २ ॥ इति पितुः छन्नं अभ्यर्थितौ किन्नरौ कन्यायै पटं प्रदाय, नृपसत्कृतौ चित्रलेखार्थं जग्मतुः. ॥ ॥ ३ ॥

अर्थः—तमो चित्रलेखापासे आवी (बीजी) छबी चीतरावजो? अने ( मारां ) नयनोने हरनारी, तथा (मारा) प्राणोना आधारभूत एवी आ छबी मने आपो? ॥ २ ॥ एम (पोताना) पिताथी गुप्तरीते मागणी करवाथी ते बन्ने किन्नरो ते कन्याने ते छबी आपीने, राजाए सत्कार कर्याबाद चित्रलेखा पासे गया. ॥ ३ ॥ युग्मं ॥

**कन्यामुखेन्दुविच्छायमार्गनद्यम्बुजव्रजः । त्वन्मित्रं त्वामयं स्वामिन्नृपः सत्वरमेति सः ॥ ४ ॥**

अन्वयः—(हे) स्वामिन्! कन्या मुख इन्दु विच्छाय मार्ग नदी अंबुज व्रजः त्वत् मित्रं सः नृप त्वां सत्वरं एति. ॥ ४ ॥

अर्थः–हे स्वामी! ते कन्याना मुखरूपी चंद्रथी झांखो कर्यो छे मार्गनी नदीओनो कमलोनो समूह जेणे, एवो आपनो मित्र ते राजा आपनीपासे तुरत आवे छे. ॥ ४ ॥

**श्रीचम्पेश भवद्देशसीमानं समुपेयुषा । तेनाहं प्रहितस्तुभ्यमिति ज्ञापयितुं पुरः ॥ ५ ॥**

अन्वयः–(हे) चंपाईश! भवत् देश सीमानं समुपेयुषा तेन तुभ्यं इति ज्ञापयितुं अहं पुरः प्रहितः. ॥ ५ ॥

अर्थः–हे चंपानगरीना स्वामी! आपना देशनी सीमापासे आवेला एवा ते राजाए तमोने आ हकीकत जणाववामाटे मने अगाउथी (अहीं) मोकलयो छे. ॥ ५ ॥

**अथ श्रीवसुपूज्योऽङ्गलग्नं भूषणमद्भुतम् । ददौ मुदा सुवेगाय निःशेषं शेखरं विना ॥ ६ ॥**

अन्वयः—अथ श्रीवसुपूज्यः मुदा शेखरं विना अंग लग्नं निःशेषं अद्भुतं भूषणं सुवेगाय ददौ. ॥ ६ ॥

अर्थः–पछी ते श्रीवसुपूज्य राजाए हर्षथी मुकुटशिवाय शरीरपर पहेरेलां सघळां अद्भुत आभूषणो ते सुवेगदूतने आपी दीधां.

**पश्यन्नुत्पश्यवदनान्प्रसादोर्मिस्पृशा दृशा । अभ्यधाच्च सुबुद्ध्यादीन्सचिवान्भूशचीवरः ॥ ७ ॥**

अन्वयः–च उत्पश्य वदनान् सुबुद्धि आदि सचिवान् प्रसाद उर्मि स्पृशा दृशा पश्यन् भूशचीवरः अभ्यधात्. ॥ ७ ॥

अर्थः–पछी उंचुं जोता मुखवाळा सुबुद्धिआदिक मंत्रिओप्रते, मेहेरबानीना मोजांओने स्पर्श करनारी दृष्टिथी जोतो एवो ते राजा कहेवा लाग्यो के, ॥ ७ ॥

**अहो श्रीवासुपूज्यस्योद्वाहचिन्ता च मेऽभवत् । कन्यारत्नमिहायातं सुवेगश्च न्यवेदयत् ॥ ८ ॥**

अन्वयः—अहो ! च मे श्रीवासुपूज्यस्य उद्वाह चिंता अभवत्, च सुवेगः कन्या रत्नं इह आयातं न्यवेदयत्. ॥ ८ ॥

अर्थ—अहो ! मने आ श्रीवासुपूज्यप्रभुना विवाहनी चिंता थती हती, अने ते सुवेगे जणाव्युं छे के, तेवी रत्नसरखी कन्या तो अहीं (तेमने परणवामाटे) (सामी) आवेली छे. ॥ ८ ॥

**कार्यारम्भेऽनुकूलार्थसंपत्तिः शकुनं महत् । इत्थं ग्रन्थार्थ एवायमुत्साहयति मामिह ॥ ९ ॥**

अन्वयः—कार्य आरंभे अनुकूल अर्थ संपत्ति महत् शकुनं, इत्थं अयं ग्रंथ अर्थः एव मां इह उत्साहयति. ॥ ९ ॥

अर्थ—कार्यना प्रारंभमां अनुकूल सामग्रीनी जे प्राप्ति थवी, तेज महान् शकुनरूप छे, एवा प्रकारनो आ प्रस्तावज मने अहीं उत्साहित करे छे. ॥ ९ ॥

तद्युक्तं संमुखं गन्तुमिदानीं तस्य भूपतेः । युक्तमेवेत्यमात्योक्तः सोऽचलत्सपरिच्छदः ॥ १० ॥

अन्वयः–तत् इदानीं तस्य भूपतेः सन्मुखं गंतुं युक्तं, युक्तं एव इति अमात्य उक्तः सः सपरिच्छदः अचलत्. ॥ १० ॥

अर्थः–माटे आ समये ते राजानी सामे जवुं लायक छे, (आपनुं ए कहेवुं) योग्यज छे, एम मंत्रीओए कहेवाथी ते वसुपूज्य-राजा परिवारसहित ( तेनी सन्मुख ) जवा लाग्यो. ॥ १० ॥

अमन्दानन्दमहिमाविमावमिलतां नृपौ । गुरूपदिष्टतत्त्वार्थश्रोतृश्रद्धारसाविव ॥ ११ ॥

अन्वयः–गुरु उपदिष्ट तत्त्व अर्थ श्रोतृ श्रद्धा रसौ इव अमंद आनंद महिमौ इमौ नृपौ अमिलतां. ॥ ११ ॥

अर्थः–गुरुना उपदेशेला तत्त्वार्थ अने सांभळनाराओना श्रद्धारसनीपेठे अत्यंत आनंदना उभरावाळा ते बन्ने राजाओ ( परस्पर ) एकठा मळ्या. ॥ ११ ॥

आश्लेषकुशलप्रश्नप्रीतिवाक्यप्रमोदिनौ । एकस्वर्णरथारूढौ तौ पुरान्तमुपेयतुः ॥ १२ ॥

अन्वयः—आश्लेष कुशलप्रश्न प्रीति वाक्य प्रमोदिनौ तौ एक स्वर्ण रथ आरूढौ पुरांतं उपेयतुः. ॥ १२ ॥

अर्थः—पछी (परस्पर) आलिंगन, कुशलपृच्छा, अने प्रेम भरेलां वचनोथी खुशी थयेला एवा तेओ बन्ने राजा एकज सुवर्णना रथमां बेसीने नगरनी नजीक आव्या. ॥ १२ ॥

लीलाविलासमावास्य तत्रावासे महीयसि । यथोचितं च सत्कृत्य वसुपूज्योऽविशत्पुरीम् ॥ १३ ॥

अन्वयः-तत्र महीयसि आवासे लीलाविलासं समावास्य च यथोचितं सत्कृत्य वसुपूज्यः पुरीं अविशत्. ॥ १३ ॥

अर्थः—त्यां म्होटा मेहेलमां ते लीलाविलासराजाने उतारो आपीने तथा योग्यतामुजब तेनो सत्कार करीने वसुपूज्यराजा नगरमां दाखल थया. ॥ १३ ॥

**अन्तः संततसंचारैः सचिवैः शुचिवाचकैः । द्रढयांचक्रतुस्तौ च वरकन्याकरग्रहम् ॥ १४ ॥**

अन्वयः-च तौ अंतः सतत संचारैः, शुचि वाचकैः सचिवैः वर कन्या कर ग्रहं द्रढयां चक्रतुः. ॥ १४ ॥

अर्थः-पछी तेओ बन्नेए, अंदर संचार करता, तथा पवित्र वचनोवाळा एवा मंत्रीओमारफत वरकन्यानुं सगपण दृढ कर्युं.

**ददौ कुण्डलयित्वाथ तद्दिनाद्दशमेऽहनि । उभाभ्यां सत्कृतः शुद्धं लग्नं ज्योतिर्विदां वरः ॥ १५ ॥**

अन्वयः—अथ उभाभ्यां सत्कृतः ज्योतिर्विदां वरः कुंडलयित्वा तत् दिनात् दशमे अहनि शुद्धं लग्नं ददौ. ॥ १५ ॥

अर्थः—पछी तेओ बन्नेथी सत्कार पामेला उत्तम ज्योतिषीए लग्न कुंडली बेसाडीने ते दिवसथी दशमे दिवसे शुद्ध लग्न जोइ आप्युं. ॥ १५ ॥

**पादौ प्रक्षाल्य कल्याणप्रदौ कल्याणदानवान् । नृपः श्रीवासुज्याय कन्यां स प्रददौ मुदा ॥ १६ ॥**

अन्वयः-कल्याण दानवान् सः नृपः कल्याणप्रदौ पादौ प्रक्षाल्य मुदा श्रीवासुपूज्याय कन्यां प्रददौ. ॥ १६ ॥

अर्थः—पछी सुवर्णनुं दान आपनारा ते राजाए ( प्रभुना ) कल्याणकारी चरणोनुं प्रक्षालन करीने हर्षथी ते श्रीवासुपूज्यप्रभुने

(पोतानी) कन्या आपी. ॥ १६ ॥

शुभेऽहनि जयादेव्या तथा मदनरेखया । पस्पृशे कर्म वैवाह्यं गानैर्धवलमङ्गलैः ॥ १७ ॥

अन्वयः—शुभे अहनि तया जयादेव्या (च) मदनरेखया धवल मंगलैः गानैः वैवाह्यं कर्म पस्पृशे. ॥ १७ ॥

अर्थः—पछी शुभ दिवसे ते जयादेवीए तथा मदनरेखाए धवलमंगलना गीतो गाइने विवाहसंबंधि कार्यो करवा मांड्यां. ॥१७॥

संमर्दचकिता विद्यादेवता इव षोडश । स्थम्माग्राण्यभजन्नाथमीक्षितुं शालभञ्जिकाः ॥ १८ ॥

अन्वयः—संमर्द चकिताः षोडश विद्या देवताः नाथ ईक्षितुं इव शालभंजिकाः स्तंभ अग्राणि अभजन्. ॥ १८ ॥

अर्थः—भीडाभीडथी डरेली शोळ विद्यादेवीओ जाणे प्रभुने जोवामाटे आवी होय नही! एवी पुतळीओने स्तंभोनी टोंचोपर चोडवामां आवी हती. ॥ १८ ॥

समुक्तागुल्ममुक्तास्रग्नोलचन्द्रोदयच्छलात् । शब्दपूर्त्यै विभूद्वाहे प्राप्तमिन्दूडुभृन्नभः ॥ १९ ॥

अन्वयः—समुक्ता गुल्म मुक्ता स्रग् नील चंद्रोदय छलात्, विभु उद्वाहे शब्द पूर्त्यै इंदु उडु भृत् नभः प्राप्तं. ॥ १९ ॥

अर्थः—मोतीओना झुमखाओवाळी मोतीओनी माळाओवाळा श्याम चंद्रवाना मिषथी प्रभुना विवाहमां (गीतोना) नादोने भरवामाटे चंद्र अने ताराओथी भरेलुं (जाणे) आकाश पोते आवी पहोंच्युं हतुं. ॥ १९ ॥

दिग्मुखानीव चत्वारि सोत्कण्ठानीक्षितुं विभुम् । चलवन्दनमालाभ्रूभाञ्जि स्तम्भान्तराण्यभुः ॥ २० ॥

अन्वय–विभुं ईक्षितुं सोत्कंठानि चत्वारि दिग्मुखानि इव चल वंदनमाला भ्रूभांजि स्तंभांतराणि अभुः. ॥ २० ॥

अर्थः—प्रभुने जोवामाटे उत्कंठित थयेलां चारे दिशाओनां जाणे मुखो होय नही ! तेम चपल तोरणोरूपी भ्रुकुटिने धारण करनारा, स्तंभोनी वच्चेना भागो शोभता हता. ॥ २० ॥

**नवाङ्गवेदिकादम्भनिधिकुम्भोपलक्षिताः । तत्रेयुः स्वामिसेवायै श्रियश्चतसृणां दिशाम् ॥ २१ ॥**

अन्वयः–नव अंग वेदिका दंभ निधि कुंभ उपलक्षिताः चतसृणां दिशां श्रियः स्वामि सेवायै तत्र ईयुः. ॥ २१ ॥

अर्थः—नव अंगोवाळी वेदिकाना मिषथी निधानकलशोथी युक्त थयेली चारे दिशाओनी लक्ष्मीओ (जाणे) प्रभुनी सेवा करवामाटे त्यां आवी हती. ॥ २१ ॥

**अपि श्रीवासुपूज्यस्य विवाहोपकृतौ वयम् । इति रोमाञ्चिता वेद्यो बभुर्बद्धैर्यवाङ्कुरैः ॥ २२ ॥**

अन्वयः–वयं अपि श्रीवासुपूज्यस्य विवाह उपकृतौ, इति बद्धैः यवांकुरैः रोम अंचिताः वेद्यः बभुः. ॥ २२ ॥

अर्थः—अमो पण आ श्रीवासुपूज्यप्रभुना विवाहमां उपयोगी छीये, एवा विचारथी बांधेला यवांकुरोवडे (जाणे) रोमांचित थयेली वेदीओ शोभती हती. ॥ २२ ॥

**इतश्च तेनुरभ्यङ्गमङ्गनाः कृतमङ्गलाः । स्वर्णासनजुषः पद्मावत्यास्तैलैः सुगन्धिभिः ॥ २३ ॥**

अन्वयः–इतश्च कृत मंगलाः अंगनाः स्वर्ण आसन जुषः पद्मावत्याः सुगंधिभिः तैलैः अभ्यंगं तेनुः. ॥ २३ ॥

अर्थः—एवामां करेल छे मंगल जेओए एवी स्त्रीओ, सुवर्णना सिंहासनपर बेठेली पद्मावतीने सुगंधि तेलोथी मर्दन करवा लागी.

**उद्वर्तयांबभूवुस्ता हृष्टाः पिष्टातकैरिमाम् । अस्या मन इव स्वामिगुणालिंगनमङ्गलैः ॥ २४ ॥**

अन्वयः—स्वामी गुण आलिंगन मंगलैः अस्याः मनः इव, हृष्टाः ताः पिष्टातकैः इमां उद्वर्तयां बभूवुः. ॥ २४ ॥

अर्थ—प्रभुना गुणोना आलिंगनना मंगलोवडे जाणे तेणीनुं हृदय भरती होय नही! तेम हर्षित थयेली ते स्त्रीओ पीठीवडे तेणीनुं उद्वर्तन करवा लागी. ॥ २४ ॥

**अङ्गेषु नवसु न्यस्तमङ्गल्यतिलका बभुः । तस्यां नवग्रहीतोषा इव स्वामिकरग्रहे ॥ २५ ॥**

अन्वयः—स्वामि कर ग्रहे तस्यां नवग्रही तोषाः इव, नवसु अंगेषु न्यस्त मंगल्य तिलकाः बभुः. ॥ २५ ॥

अर्थ—प्रभुनो हस्तमेलाप करवामां तेणीप्रते जाणे नवे ग्रहो संतुष्ट थया होय नही! तेम (तेणीना) नवे अंगे करेलां मांगल्य तिलको शोभतां हतां. ॥ २५ ॥

**तदङ्गं भाग्यसौधं ताः स्वस्तिकारंभसूत्रवत् । तर्कुकौसुम्भसूत्रेणास्पृशन्सव्यापसव्ययोः ॥ २६ ॥**

अन्वयः—ताः भाग्य सौधं तदंगं स्वस्तिक आरंभ सूत्रवत् तर्कु कौसुभ सूत्रेण सव्य अपसव्ययोः अस्पृशन्. ॥ २६ ॥

अर्थः—पछी तेओए सौभाग्यना महेल सरखां तेणीना शरीरने स्वस्तिकना (मंगलीकना) प्रारंभसूत्रनीपेठे ताकडी अने कसुम्बी सूत्रवडे जमणी अने डाबी बाजुए स्पर्श कर्यों. ॥ २६ ॥

**वर्णके निहिता सेयं ताभिः संरुद्धचापला । ध्यायन्ती हृदि विश्वेशं योगिनीव व्यराजत ॥ २७ ॥**

अन्वयः–संरुद्ध चापला इयं सा ताभिः वर्णके निहिता, हृदि विश्व ईशं ध्यायंती योगिनी इव व्यराजत. ॥ २७ ॥

अर्थः–रोकेल छे चपलभाव जेणीए, एवी ते आ राजकुमारीने (ज्यारे) तेओए वाने घाली, त्यारे मनमां प्रभुनुं ध्यान धरती योगिनीसरखी ते शोभती हती. ॥ २७ ॥

**वर्णकस्य विवादीव तस्या उद्वर्णकः कृतः । ताभिस्तथाविधानां तद्विधीनामनुवादकृत् ॥ २८ ॥**

अन्वयः–ताभिः तथाविधानां तद्विधीनां अनुवादकृत्, वर्णकस्य विवादी इव तस्याः उद्वर्णकः कृतः ॥ २८ ॥

अर्थः–पछी तेओए तेवा प्रकारनी ते विधिओनो अनुवाद करनारो, ते वानाना विवादीसरखो तेणीने उद्वानो कर्यो. ॥ २८ ॥

**स्वाम्यंगसममाणिक्यभृङ्गारस्पर्शिभिर्जलैः । हृष्यन्त्यः स्नपयामासुस्तास्तां न्यस्यासनान्तरे ॥ २९ ॥**

अन्वयः–स्वामि अंग सम माणिक्य भृंगार स्पर्शिभिः जलैः, हृष्यंत्यः ताः तां आसन अंतरे न्यस्य स्नपयामासुः. ॥ २९ ॥

अर्थः—पछी प्रभुना ( लालरंगना ) शरीरसरखा माणिक्यना कलशोमां भरेलां जलवडे, खुशी थती एवी ते स्त्रीओए तेणीने बीजां आसनपर बेसाडीने स्नान कराव्युं. ॥ २९ ॥

**धूपितामद्भुतैर्धूपैरासयन्नासनान्तरे । ताश्चारुचीरनिर्नीरशरीरचिकुरां च ताम् ॥ ३० ॥**

अन्वयः–च ताः चारु चीर निर्नीर शरीर चिकुरां, अद्भुतैः धूपैः धूपितां तां आसन अंतरे आसयन. ॥ ३० ॥

अर्थः—पछी तेओए मनोहर वस्त्रथी तेणीनां शरीर तथा वाळने लुछी जलरहित करीने, तथा अद्भुत धूपथी धूपीने तेणीने बीजां आसनपर बेसाडी. ॥ ३० ॥

रागस्तत्पादयोस्ताभिर्लगितोऽलक्तकच्छलात् । वीतरागेऽप्यहं योज्योऽनयेति विनयीव सः ॥ ३१ ॥

अन्वयः–वीतरागे अपि अहं अनया योज्यः, इति विनयी इव रागः, अलक्तकच्छलात् ताभिः तत्पादयोः लगितः. ॥ ३१ ॥

अर्थः–रागरहित प्रभुमां पण मने आ राजकुमारी जोडी देशे, एवा विचारथी जाणे विनयवंत थयो होय नही! एवा रागने अलताना मिषथी ते स्त्रीओए तेणीने पगे लगाड्यो. ॥ ३१ ॥

सा ताभिश्चन्दनश्वेतचीरमौक्तिकभूषणैः । स्वामिप्राप्तिस्फुटीभूतैरिव भाग्यैरलंकृता ॥ ३२ ॥

अन्वयः–स्वामि प्राप्ति स्फुटीभूतैः भाग्यैः इव, सा ताभिः चंदनश्वेत चीर मौक्तिक भूषणैः अलंकृता. ॥ ३२ ॥

अर्थः—प्रभुनी प्राप्तिथी प्रगट थयेलां भाग्योवडे करीने जाणे होय नही! तेम तेणीने तेओए चंदनसरखा श्वेत वस्त्रो तथा मोतीनां आभूषणोवडे विभूषित करी. ॥ ३२ ॥

ताभिर्निदधिरे तस्याः केशेषु कुसुमस्रजः । प्रभुभीत्या स्मरेणेव गोपयामासिरे शराः ॥ ३३ ॥

अन्वयः–प्रभु भीत्या स्मरेण शराः गोपयामासिरे इव, ताभिः तस्याः केशेषु कुसुम स्रजः निदधिरे. ॥ ३३ ॥

अर्थः—प्रभुना डरथी कामदेवे जाणे पोतानां बाणो संताडीमूक्यां होय नही ! तेम तेओए तेणीना केशोमां पुष्पोनी मालाओने गुंथी दीधी. ॥ ३३ ॥

**इत्थं विहितशृङ्गारा ताभिरुत्पाञ्य सा रसात् । अन्तर्मातृगृहं नीत्वा हेमपीठे न्यवेश्यत ॥ ३४ ॥**

अन्वयः-इत्थं रसात् विहित शृंगारा सा ताभिः उत्पाञ्य अंतः मातृगृहं नीत्वा हेम पीठे न्यवेश्यत. ॥ ३४ ॥

अर्थः—एवीरीते आनंदरसथी करावेलो छे शृंगार जेणीने एवी ते राजकन्याने तेओए उंचकीने मायरानी अंदर लेइ जइ सुवर्णना पाटलापर बेसाडी. ॥ ३४ ॥

**इतश्चेन्द्रोऽवधेर्ज्ञात्वा प्रभोरुद्वाहमङ्गलम् । आययौ सपरीवारः कालज्ञा हि सुसेवकाः ॥ ३५ ॥**

अन्वयः-इतश्च इन्द्रः अवधेः प्रभोः उद्वाह मंगलं ज्ञात्वा सपरीवारः आययौ, हि सुसेवकाः कालज्ञाः ॥ ३५ ॥

अर्थः—एवामां इन्द्र अवधिज्ञानथी प्रभुना विवाहमंगलने जाणीने परिवारसहित ( त्यां ) आव्यो, केमके उत्तम सेवको अवसरना जाणकार होय छे. ॥ ३५ ॥

**वसुपूज्यं पुरस्कृत्य तेन वाग्लोपभीरुणा । विवाहमङ्गलकृते कृतिनाभ्यर्थितः प्रभुः ॥ ३६ ॥**

अन्वयः-वाग्लोप भीरुणा तेन कृतिना वसुपूज्यं पुरस्कृत्य विवाहमंगल कृते प्रभुः अभ्यर्थितः. ॥ ३६ ॥

अर्थः-वचनलोपथी डरता एवा ते कुशल इंद्रे वसुपूज्यराजाने अगाडी करीने विवाहमंगलमाटे प्रभुने विनंति करी. ॥ ३६ ॥

**मोक्षाध्वरोधि भोक्तव्यं कर्म भेत्तुं जिनोऽप्यथ । कामं जित्वा तदस्त्रीस्त्रीं पाणौ कर्तुं मनो दधे ॥३७॥**

अन्वयः-अथ जिनः अपि मोक्ष अध्व रोधि भोक्तव्यं कर्म भेत्तुं कामं जित्वा तदस्त्री स्त्रीं पाणौ कर्तुं मनः दधे. ॥ ३७ ॥

अर्थः-पछी ते जिनेश्वर प्रभुए पण मोक्ष मार्गने रोकनारां भोगावलि कर्मोने भेदवामाटे कामदेवने जीतीने, तेना शस्त्ररूप स्त्रीने हाथ करवाने मन कर्युं. ॥ ३७ ॥

**मलस्वेदादिमुक्तोऽपि विधिज्ञेन बिडौजसा । अस्नप्यत मुदा रत्नप्रतिमास्थ इव प्रभुः ॥ ३८ ॥**

अन्वयः-मल स्वेद आदि मुक्तः अपि प्रभुः विधिज्ञेन बिडौजसा मुदा रत्न प्रतिमास्थः इव अस्नप्यत. ॥ ३८ ॥

अर्थः-मेल अने पसीनाआदिकथी रहित एवा पण प्रभुने विधि जाणनारा इंद्रे हर्षथी रत्नमय प्रतिमारूपनी पेठे स्नान कराव्युं.

**सर्वाङ्गीणं विभुर्भोगफलकर्मजयोन्मुखः । दधौ धर्ममयं वर्म चन्दनालेपनच्छलात् ॥ ३९ ॥**

अन्वयः-भोग फल कर्म जय उन्मुखः विभुः, चंदन आलेपन च्छलात् सर्वांगीणं धर्ममयं वर्म दधौ. ॥ ३९ ॥

अर्थः-भोगावलीकर्मोने जीतवाने तैयार थयेला प्रभुए चंदनना विलेपनना मिषथी सर्व शरीरपर धर्ममय बखतरने धारण कर्युं.

**ताद्रूप्यमेव बिभ्रद्भिरत्यच्छजलजीवितैः । न मुक्ताभरणैर्भर्तुः पिहिता देहदीधितिः ॥ ४० ॥**

अन्वयः-ताद्रूप्यं एव बिभ्रद्भिः, अति अच्छ जल जीवितैः मुक्ता आभरणैः भर्तुः देह दीधितिः न पिहिता. ॥ ४० ॥

अर्थः—तादृश्यपणानेज धारण करनारां, तथा अति निर्मल जलमां जीवन गाळनारां, एवां मोतीओनां आभूषणोथी (पण) प्रभु-

ना शरीरनी कांति आच्छादित थइ शकी नही. ॥ ४० ॥

**अत्यद्भुतद्युतिः स्वामी धृतस्वच्छसितांशुकः । ज्योत्स्नावलितमाणिक्यशैलशृङ्गनिभो बभौ ॥ ४१ ॥**

अन्वयः–अति अद्भुत द्युतिः, धृत स्वच्छ सितांशुकः स्वामी ज्योत्स्ना आवलित माणिक्य शैल शृंग निभः बभौ. ॥ ४१ ॥

**अर्थः**—अत्यंत अद्भुत (लाल) कांतिवाळा, तथा पहेरेल छे निर्मल श्वेत वस्त्रो जेणे एवा ते प्रभु, चांदनीथी आच्छादित थयेला रोहणाचलना शिखरनीपेठे शोभता हता. ॥ ४१ ॥

**आरुह्य मधुरारावमैरावणमथ प्रभुः । क्षीराब्धिवीचीं बालार्कप्रतिबिम्ब इवाचलत् ॥ ४२ ॥**

अन्वयः–अथ प्रभुः मधुर आरावं ऐरावणं आरुह्य क्षीर अब्धि वीचीं बाल अर्क प्रतिबिंबः इव अचलत्. ॥ ४२ ॥

**अर्थः**—पछी ते प्रभु मधुर शब्द करता ऐरावणहाथीपर चडीने, क्षीरसमुद्रना मोजांपर आरूढ थयेला उगता सूर्यना प्रतिबिंबनीपेठे चालवा लाग्या. ॥ ४२ ॥

**करौघं चामरीकृत्य छत्रीकृत्य च मण्डलम् । तदेन्दुर्लाञ्छनं भेत्तुमिव देवमसेवत ॥ ४३ ॥**

अन्वयः—तदा इंदुः लांछनं भेत्तुं इव, कर ओघं चामरीकृत्य, च मंडलं छत्रीकृत्य देवं असेवत. ॥ ४३ ॥

**अर्थः**—ते वखते चंद्र जाणे पोताना लांछनने दूर करवामाटे, (पोतानां) किरणोना समूहने चामररूप करीने, अने मंडलने छत्ररूप करीने प्रभुने सेववा लाग्यो. ॥ ४३ ॥

मुहुर्मङ्गल्यकलशः कलितः कुलबालया । प्रभोर्मुखाग्रे बभ्राम शोभाभिक्षुरिवोडुपः ॥ ४४ ॥

अन्वयः—कुल बालया मुहुः कलितः मंगल्य कलशः, शोभा भिक्षुः उडुपः इव प्रभोः मुख अग्रे बभ्राम. ॥ ४४ ॥

अर्थः—कुलबालाए वारंवार भमावेलो मंगलकलश, शोभानी भिक्षा मागवा आवेला चंद्रनीपेठे प्रभुना मुखपासे भमवा लाग्यो.

परीक्षादक्षयेन्द्राण्या लावण्यैकनिधेर्विभोः । मुहुरुत्तारणीकृत्य लवणं तत्यजेऽभितः ॥ ४५ ॥

अन्वयः—परीक्षा दक्षया इन्द्राण्या लावण्य एक निधेः विभोः लवणं मुहुः उत्तारणीकृत्य अभितः तत्यजे. ॥ ४५ ॥

अर्थः—परीक्षा करवामां चतुर एवी इन्द्राणीए, लावण्यना एक निधानसरखा प्रभुनुं लवण वारंवार उतारीने चोतरफ फेंकी दीधुं.

मूढस्य गूढं तीर्थेशवरभावमजानतः । गलगर्जिर्भवस्येव तदा तूर्यस्वनोऽजनि ॥ ४६ ॥

अन्वयः—गूढं तीर्थेश वर भावं अजानतः मूढस्य भवस्य गलगर्जिः इव तदा तूर्य स्वनः अजनि. ॥ ४६ ॥

अर्थः—तीर्थंकरप्रभुना उत्तम गुप्त भावने नही जाणनारा एवा मूढ संसारना गळाना नाद सरखो ते समये वाजित्रोनो स्वर थवा लाग्यो. ॥ ४६ ॥

पुरः सुरस्त्रियोऽनृत्यन्ध्वनद्धवलमङ्गलाः । प्रभुस्तासां प्रमोदाय दधौ हृष्टमिवाननम् ॥ ४७ ॥

अन्वयः—ध्वनत् धवल मंगलाः सुरस्त्रियः पुरः अनृत्यन्, प्रभुः तासां प्रमोदाय इव हृष्टं आननं दधौ. ॥ ४७ ॥

अर्थः—धवलमंगलो गाती देवांगनाओ प्रभुपासे नाचवा लागी, त्यारे प्रभु पण तेओने जाणे आनंदित करवामाटे आनंदित मुख

धारण करवा लाग्या. ॥ ४७ ॥

मुहुर्मुहुः स्वपुत्रास्यं पश्यन्ती नृविमानगा । जगौ वृता सखीवृन्दैर्जया धवलमङ्गलान् ॥ ४८ ॥

अन्वयः—सखी वृंदैः वृता नृविमानगा जया मुहुः मुहुः स्व पुत्र आस्यं पश्यंती धवल मंगलान् जगौ. ॥ ४८ ॥

अर्थः—(वळी ते वखते) सखीओना समूहथी वींटायेली, तथा पालखीमां बेठेली जयाराणी वारंवार पोताना पुत्रनुं मुख जोतीथकी धवलमंगलो गाती हती. ॥ ४८ ॥

वसुपूज्यो नृसंघट्टस्पर्धावर्धिष्णुसंमदः । वृतः शक्रादिभिर्देवैर्दिव्ययानः पुरोऽचलत् ॥ ४९ ॥

अन्वयः—नृ संघट्ट स्पर्धा वर्धिष्णु संमदः, शक्र आदिभिः देवैः वृतः, दिव्य यानः वसुपूज्यः पुरः अचलत्. ॥ ४९ ॥

अर्थः—माणसोनी गडदीनी स्पर्धाथी वृद्धि पामतो छे हर्ष जेमनो, तथा इन्द्रआदिक देवोथी वींटायेला, अने मनोहर वाहनवाळा वसुपूज्यराजा आगळ चालता हता. ॥ ४९ ॥

इत्थं कृतार्थयन्नाथो जनाक्षीण्यमृतप्लवैः । आसदन्मण्डपद्वारं पूर्वाद्वारमिवोडुपः ॥ ५० ॥

अन्वयः—इत्थं अमृत प्लवैः जन अक्षीणि कृतार्थयन् नाथः, उडुपः पूर्वाद्वारं इव, मंडप द्वारं आसदत्. ॥ ५० ॥

अर्थः—एवीरीते अमृतना सिंचनथी लोकोना चक्षुओने कृतार्थ करता प्रभु, चंद्र जेम पूर्वदिशाना द्वारपासे आवे, तेम मंडपना द्वारपासे आवी पहोंच्या. ॥ ५० ॥

मुक्तयानः स्थितस्तत्र शक्रहस्तावलम्बनः । त्यक्तकृत्यो मुनेरात्मा ध्येयलग्न इव प्रभुः ॥ ५१ ॥

अन्वयः—त्यक्त कृत्यः मुनेः आत्मा ध्येय लग्नः इव, मुक्त यानः, शक्र हस्त अवलंबनः प्रभुः तत्र स्थितः ॥ ५१ ॥

अर्थः-तजी दीधेल छे कार्य जेणे एवो मुनिनो आत्मा जेम ध्यानमां लीन थाय, तेम वाहनने तजीने प्रभु इन्द्रनो हाथ झालीने त्यां उभा. ॥ ५१ ॥

तदा मदनरेखा तु तत्तत्कृत्योत्कराकुला । अन्तरन्तरुलूलूनामादिदेशेति योषितः ॥ ५२ ॥

हंसि धेहि मणिस्थालं चम्पिके चन्दनं नय । आलि शालिकणान् मुञ्च दधि धारय धारिणि ॥ ५३ ॥

तरले सरलं वासः कौसुम्भं प्रगुणीकुरु । तिलकं स्थापय स्थाने मदने वदने मम ॥ ५४ ॥

मुखरे शेखरं यच्छ स्रजः सज्जय सज्जने । कर्पूरे देहि कर्पूरं मृगनाभिं मृगि स्मर ॥ ५५ ॥

किमेवं मन्दचारिण्यो यूयं किं नात्र पश्यथ । नन्वयं वीक्ष्यते द्वारि वरस्त्रिजगतीवरः ॥ ५६ ॥

अन्वयः-तदा तत् तत् कृत्य उत्कर आकुला मदनरेखा तु उलूलूनां अंतः अंतः योषितः इति आदिदेश, ॥ ५२ ॥ (हे) हंसि! मणि स्थालं धेहि? (हे) चंपिके चंदनं नय? (हे) आलि! शालि कणान् मुंच? ( हे ) धारिणि! दधि धारय? ॥ ५३ ॥ (हे) तरले! कौसुंभं वासः सरलं प्रगुणीकुरु? (हे) मदने! मम वदने स्थाने तिलकं स्थापय? ॥ ५४ ॥ (हे) मुखरे! शेखरं यच्छ? (हे)

सज्जने ! स्रजः सज्जय ? (हे) कर्पूरे कर्पूरं देहि ! (हे) मृगि ! मृगनाभिं स्मर ? ॥ ५५ ॥ यूयं एवं मंद चारिण्यः किं ? किं अत्र न पश्यथ ? ननु अयं त्रि जगती वरः वरः द्वारि वीक्ष्यते. ॥ ५६ ॥ पंचभिः कुलकं ॥

अर्थः-ते वखते ते ते कार्योना समूहमां व्याकुल होवा छतां पण मदनरेखा गीतो गाती थकी वच्चे वच्चे स्त्रीओने नीचेमुजब आदेश देवा लागी, ॥ ५२ ॥ हे हंसि ! तुं मणिनो स्थाळ लेइले ? हे चंपिका ! तुं चंदन लेइजा ? हे आलि ! तुं चावलना दाणा मूक ? हे धारिणि ! तुं दहीं ले ! ॥ हे तरला ! तुं कसुंबी चुंदडी उकेली नाख ! हे मदना ! तुं मारां मुखपर तिलक कर ? ॥५४॥ हे मुखरा ! तुं मोड आप ? हे सज्जना ! तुं माला तैयार कर ? हे कर्पूरा ! तुं कपूर आप ! हे मगी ! तुं कस्तूरी संभाळ ? ॥५५॥ तमो आम धीमेधीमे केम चालो छो ? शुं अहीं जोती नथी ? त्रणे जगतना स्वामी एवा आ वरराजा तो खरेखर बारणे आवी पहोंच्या देखाय छे. ॥ ५६ ॥ पंचभिः कुलकं ॥

**प्रभुलावण्यदेहार्चिः स्पर्धिनौ द्वारि काप्यथ । शरावसंपुटे क्षिप्त्वा मुमोच लवणानलौ ॥ ५७ ॥**

अन्वयः-अथ का अपि प्रभु लावण्य देह अर्चिः स्पर्धिनौ लवण अनलौ शराव संपुटे क्षिप्त्वा द्वारि मुमोच. ॥ ५७ ॥

अर्थः—पछी कोइक स्त्रीए प्रभुनां लावण्य तथा शरीरनी कांतिनी स्पर्धा करनारां लवण अने अग्निने सरावलांना संपुटमां मेलीने ते बारणापासे मूक्युं. ॥ ५७ ॥

**दूर्वादधिशुभं स्थालं दधौ कापि प्रभूत्सवे । संक्षिप्तागतनीलाब्जफेनभृन्मानसोपमम् ॥ ५८ ॥**

अन्वयः—का अपि प्रभु उत्सवे संक्षिप्त आगत नील अब्ज फेनभृत् मानस उपमं दूर्वा दधि शुभं स्थालं दधौ. ॥ ५८ ॥

अर्थः—पछी कोइक स्त्री आ प्रभुना विवाह महोत्सवमां ( पोताना आकारने ) संकोचीने आवेलां, तथा लीलां कमल अने फीणथी भरेलां मानससरोवरसरखा, दूर्वा अने दहींथी भरेला थालने धारण करती हती. ॥ ५८ ॥

**मन्थानं मुसलं काचित्पाणौ कृत्वा पुरः स्थिता । कर्माणि मथितुं भंक्तुं प्रभोः शक्तिरिवाङ्गिनी ॥५९॥**

अन्वयः—कर्माणि मथितुं, भंक्तुं, प्रभोः अंगिनी शक्तिः इव, काचित् पाणौ मंथानं मुसलं कृत्वा पुरः स्थिता. ॥ ५९ ॥

अर्थ—कर्मोने वलोवी नाखवाने, तथा भांगी नाखवाने जाणे प्रभुनी देहधारी शक्ति होय नही! तेम कोइक स्त्री हाथमां रवइओ तथा मुशल लेइने अगाडी आवी उभी हती. ॥ ५९ ॥

**चक्रेऽथ चान्दनाञ्श्वश्रूः श्रीविभोस्तिलकान्नव । अङ्गेषु सोत्तमाङ्गेषु निधिश्रीदर्पणानिव ॥ ६० ॥**

अन्वयः—अथ श्वश्रूः श्रीविभोः सोत्तमांगेषु अंगेषु निधिश्री दर्पणान् इव चांदनान् नव तिलकान् चक्रे. ॥ ६० ॥

अर्थः—पछी सासुए ते श्रीजिनेश्वरप्रभुना मस्तकसहित ( नवे ) अंगोपर नवनिधानोनी लक्ष्मीओना दर्पणसरखां चंदननां नव तिलको कर्यां. ॥ ६० ॥

**अर्घं देह्यर्घदेऽर्घ्याय वरायेति गुरुस्वरैः । धवले गोयमने सा प्रभोरर्घं ददाविति ॥ ६१ ॥**

अन्वयः—(हे) अर्घदे ! अर्घ्याय वराय अर्घं देहि ? इति गुरुस्वरैः धवले गीयमाने सा प्रभोः इति अर्घं ददौ. ॥ ६१ ॥

अर्थः—हे अर्घ देनारी ! आ पूजनीक वरराजाने अर्घ आप ? एम म्होटा स्वरथी धवलमंगलनुं गीत गवाते छते तेणीए एरीते प्रभुने अर्घ आप्युं. ॥ ६१ ॥

**जगतां मङ्गलस्यापि दूर्वादध्यक्षतैर्विभोः । चक्रे सा मङ्गलं यस्माल्लोकस्याचरणं महत् ॥ ६२ ॥**

अन्वयः—जगतां मंगलस्य अपि विभोः सा दूर्वा दधि अक्षतैः मंगलं चक्रे, यस्मात् लोकस्य आचरणं महत्. ॥ ६२ ॥

अर्थः—जगतने मंगलिकरूप एवा पण ते प्रभुनुं तेणीए दूर्वा, दहीं तथा अक्षतथी मंगल कर्युं, केमके लोकाचार मुख्यपणुं भोगवे छे.

**अथोत्तरीयकौसुम्भांशुकच्छन्नमुखेन सा । त्रिः पस्पर्श विभोर्भालं मथा च मुसलेन च ॥ ६३ ॥**

अन्वयः—अथ सा उत्तरीय कौसुंभ अंशुक च्छन्न मुखेन मथा च मुसलेन च विभोः भालं त्रिः पस्पर्श. ॥ ६३ ॥

अर्थः—पछी तेणीए कसुंबी चुंदडीना छेडाथी आच्छादित करेला मुखवाळा रवइयाथी तथा मुशलथी प्रभुना ललाटने त्रणवार स्पर्श कर्यो. ॥ ६३ ॥

**त्रटत्त्रटिति तन्वानं लवणानलपूरितम् । शरावसंपुटं चाग्रे विभोरुत्तार्य सामुचत् ॥ ६४ ॥**

अन्वयः—च त्रटत् त्रट् इति तन्वानं, लवण अनल पूरितं शराव संपुटं उत्तार्य सा विभोः अग्रे अमुचत्. ॥ ६४ ॥

अर्थः—पछी तड्तड् शब्द करतो, अने लवण तथा अग्निथी भरेलो शरावलांनो संपुट उतारीने तेणीए प्रभुनी पासे मूक्यो.

**सपादुकेन वामेन तद्भञ्जांघ्रिणा प्रभुः । जगत्प्राणस्य का लज्जा भवेद् बुद्बुदभञ्जने ॥ ६५ ॥**

अन्वयः—प्रभुः सपादुकेन वामेन अंघ्रिणा तत् बभंज, जगत्प्राणस्य बुद्बुद भंजने का लज्जा भवेत् ? ॥ ६५ ॥

अर्थः—पछी प्रभुए पहेरेली पावडीवाळा डाबा पगथी ते शरावसपुट भांगी नाख्युं, केमके जगत्ना प्राणभूत एवा वायुने परपोटो भांगवामां शुं कंइ शरम आवे ? ॥ ६५ ॥

**कौसुम्भवसनं कण्ठे क्षिप्त्वा मदनरेखया । आकृष्य प्रापितो मातृगृहं स्वामी तया रयात् ॥ ६६ ॥**

अन्वयः—तया मदनरेखया कंठे कौसुंभ वसनं क्षिप्त्वा, आकृष्य स्वामी रयात् मातृगृहं प्रापितः. ॥ ६६ ॥

अर्थः—पछी ते मदनरेखा (प्रभुना) कंठमां कसुंबी दुपट्टो नाखीने, तथा तेथी खेंचीने प्रभुने तुरत मायरामां लावी. ॥ ६६ ॥

**सितवस्त्रावृताङ्गोऽत्र मातॄणामग्रतः प्रभुः । निषसादासने हैमे हंसः स्वर्णाम्बुजे यथा ॥ ६७ ॥**

अन्वयः—अत्र सित वस्त्र आवृत अंगः प्रभुः, स्वर्ण अंबुजे यथा हंसः, मातॄणां अग्रतः हैमे आसने निषसाद. ॥ ६७ ॥

अर्थः—(पछी) अहीं श्वेत वस्त्रोथी आच्छादित थयेला शरीरवाळा प्रभु, सोनेरी कमलपर जेम हंस बेसे, तेम माताओनी पासे सुवर्णना आसनपर बेठा. ॥ ६७ ॥

**कन्दर्पराट्श्रीकरणमुद्राभमदनान्वितम् । वरवध्वोर्बबन्धेन्द्रः कङ्कणं दक्षिणे करे ॥ ६८ ॥**

अन्वयः—इंद्रः कंदर्प राट् श्री करण मुद्राभ मदन अन्वितं कंकणं वर बध्वोः दक्षिणे करे बबंध. ॥ ६८ ॥

अर्थः—पछी इन्द्रे मदनराजनी शोभा करनारी मुद्रासरखा मींढोळसहित वरवहुना जमणा हाथमां कंकण बांध्युं. ॥ ६८ ॥

उत्स्तृतस्वच्छवस्त्रोर्मिस्फुटीभूतमुखाब्जयोः । तयोर्दर्शनमन्योन्यं वरवध्वोरभूत्ततः ॥ ६९ ॥

अन्वयः—ततः उत्स्तृत स्वच्छ वस्त्र ऊर्मि स्फुटीभूत मुख अब्जयोः तयोः वरवध्वोः अन्योन्यं दर्शनं अभूत्. ॥ ६९ ॥

अर्थः—पछी उंचां करेलां निर्मल वस्त्ररूपी मोजांथी प्रगट थयेल छे मुखकमल जेमनां, एवा ते वरवहूनुं परस्पर दर्शन थयुं. ॥

एकत्रोद्गतयोः पिष्ट्वा शमीपिप्पलयोस्त्वचौ । हस्तालेपं वधूहस्ते विदधुः सधवाः स्त्रियः ॥ ७० ॥

अन्वयः—एकत्र उद्गतयोः शमी पिप्पलयोः त्वचौ पिष्ट्वा सधवाः स्त्रियः वधूहस्ते हस्तालेपं विदधुः. ॥ ७० ॥

अर्थः—पछी एकीसाथे उगेला खीजडा तथा पीपळानी छाल वाटीने सुहागण स्त्रीओए वहुना हाथमां हस्तलेपन कर्युं. ॥ ७० ॥

लग्नस्याभ्यर्णभावेन तुमुले विनिवारिते । समयः समयोऽस्तीति प्रोच्चैरुच्चरिते नरैः ॥ ७१ ॥

वधूहस्तं स्वहस्तेन शुभलग्नेऽग्रहीद्विभुः । ऊर्मिकां चात्र सुत्रामा चिक्षेप करसंपुटे ॥ ७२ ॥ युग्मम् ॥

अन्वयः—लग्नस्य अभ्यर्ण भावेन तुमुले विनिवारिते समयः समयः अस्ति, इति जनैः प्रोच्चैः उच्चरिते, ॥ ७१ ॥ शुभ लग्ने विभुः स्व हस्तेन वधू हस्तं अग्रहीत्, च अत्र कर संपुटे सुत्रामा ऊर्मिकां चिक्षेप. ॥ ७२ ॥ युग्मं ॥

अर्थः—लग्न नजीक आववाथी कोलाहल निवारीने " समय छे, समय छे, " एम लोकोए म्होटेथी बोलते छते, ॥ ७१ ॥ शुभ लग्न वखते प्रभुए पोताना हाथवडे वहुनो हाथ ग्रहण कर्यो, अने तेओना ते करसंपुटमां इन्द्रे वींटी मूकी. ॥ ७२ ॥ युग्मं ॥

बन्दिवाक्कुलवृद्धाशीस्तूर्यमङ्गलगीतिभिः । हर्षकोलाहलैर्भूरि तदापूरि जगत्त्रयम् ॥ ७३ ॥

अन्वयः—तदा बंदिवाक् कुल वृद्धा आशीः तूर्य मंगलगीतिभिः, हर्ष कोलाहलैः जगत् त्रयं भूरि अपूरि. ॥ ७३ ॥

अर्थः—ते वखते बंदिओनी वाणी, तथा कुटुंबनी वृद्ध स्त्रीओनी आशीष् अने वाजित्रोना मंगलीकनादोथी, अने हर्षना कोलाहलोथी त्रणे जगत अतिशयपणे भराइ गयां. ॥ ७३ ॥

तारामेलोऽथ तत्स्वान्तगुणर्द्धिपटयोः स्फुटम् । सकलः स्यूततां चक्रे दृग्ज्योत्स्नाहीरतन्तुभिः ॥ ७४ ॥

अन्वयः—अथ तत् स्वांत गुण ऋद्धि पटयोः सकलः तारा मेलः दृग् ज्योत्स्ना हीर तंतुभिः स्फुटं स्यूततां चक्रे. ॥ ७४ ॥

अर्थः—पछी तेओ बन्नेना हृदयना गुणोनी ( तंतुओनी ) समृद्धिरूपी वस्त्रोनो, सघळो तारामेळ चक्षुनां तेजरूपी रेशमना तांतणाओथी प्रगटपणे सीवाइ गयो. ॥ ७४ ॥

तया विश्वपतिर्युक्तो विश्वात्यद्भुतरूपया । प्रकामं कमनीयोऽभूत्क्षमयेव तपोगुणः ॥ ७५ ॥

अन्वयः—क्षमया तपः गुण इव, विश्व अति अद्भुत रूपया तया युक्तः विश्वपतिः प्रकामं कमनीयः अभूत्. ॥ ७५ ॥

अर्थः—क्षमाथी युक्त थयेला तपना गुणनीपेठे, जगतमां अति अद्भुत रूपवाळी एवी ते कन्याथी युक्त थयेला प्रभु अत्यंत मनोहर देखावा लाग्या. ॥ ७५ ॥

भक्त्यारोप्य विभुं कट्यां शक्रो वेदिगृहं प्रति । चचालैवं च पौलोमी वधूमुत्पाट्य तत्क्षणम् ॥ ७६ ॥

अन्वयः—शक्रः भक्त्या विभुं कट्यां आरोप्य वेदि गृहंप्रति चचाल, च एवं पौलोमी वधूं उत्पाटय तत्क्षणं. ॥ ७६ ॥

अर्थः–पछी इन्द्र भक्तिथी प्रभुने पोतानी केडपर बेसाडीने चोरीना मंडप तरफ चाल्या, अने ए रीते इन्द्राणी पण वहुने उंचकीने तेज क्षणे (ते तरफ) चालवा लागी. ॥ ७६ ॥

अवियुक्तकरं बद्धाञ्चलमेतद्वधूवरम् । मिलितं चलदानन्दि कीर्तिदानोपमं बभौ ॥ ७७ ॥

अन्वयः—अवियुक्त करं, बद्ध अंचलं, आनंदि, चलत् एतत् वधूवरं मिलितं कीर्तिदान उपमं बभौ. ॥ ७७ ॥

अर्थः–नथी छूटा करेला हाथ जेमना, अने बांधेलीछे छेडाछेडी जेमनी, तथा आनंदी, अने चालतुं एवुं ते वहुवरनुं जोडुं साथे मळेलां कीर्ति अने दानसरखुं शोभवा लाग्युं. ॥ ७७ ॥

पूर्वद्वारेण तत्रेशः प्रवेश्याथ तथास्थितः । गीतेषु मङ्गलेषूच्चैर्मुमुचे नमुचिद्विषा ॥ ७८ ॥

अन्वयः—अथ तथा स्थितः ईशः, नमुचि द्विषा मंगलेषु उच्चैः गीतेषु पूर्व द्वारेण प्रवेश्य तत्र मुमुचे. ॥ ७८ ॥

अर्थः–पछी तेवीज रीते केडपर बेठेला प्रभुने इंद्रे म्होटेथी मंगलगीतो गवाते छते, पूर्वने दरवाजेथी प्रवेश करीने त्यां मूक्या.

ज्वलनं मञ्जुलज्वालमभितः कान्तया सह । स्वाम्यभ्राम्यद्यथा मेरुं दिनाधीशो दिनश्रिया ॥ ७९ ॥

अन्वयः–यथा दिन अधीशः दिन श्रिया मेरुं, (तथा) कांतया सह स्वामी मंजुल ज्वालं ज्वलनं अभितः अभ्राम्यत्. ॥७९॥

अर्थः—पछी जेम सूर्य, दिवसनी लक्ष्मीसहित मेरुने प्रदक्षिणा फरे छे, तेम स्त्रीसहित ते प्रभु मनोहर ज्वालावाला अग्निनी आसपास भमवा लाग्या. ॥ ७९ ॥

लीलाविलासादेशेन मन्त्रीशस्त्रिजगद्विभोः । सुलक्षणान्परोलक्षानुत्तुङ्गांस्तुरगान्ददौ ॥ ८० ॥

अन्वयः—लीलाविलास आदेशेन मंत्री ईशः त्रिजगत् विभोः सुलक्षणान्, परोलक्षान् उत्तुंगान् तुरगान् ददौ. ॥ ८० ॥

अर्थः—पछी ते लीलाविलास राजानी आज्ञाथी मंत्रीश्वरे त्रणे जगतना स्वामी एवा प्रभुने उत्तम लक्षणोवाळा, लाखोगमे उंचा घोडाओ आप्या. ॥ ८० ॥

अथैवं वर्तिते मन्त्री द्वितीये मङ्गले विभोः । परःसहस्रान्करिणः प्रमोदादुन्मदानदात् ॥ ८१ ॥

अन्वयः—अथ एवं द्वितीये मंगले वर्तिते मंत्री प्रमोदात् विभोः उन्मदान् परःसहस्रान् करिणः अदात्. ॥ ८१ ॥

अर्थः—पछी एरीते बीजुं मंगल प्रवर्ततां मंत्रीए हर्षथी प्रभुने हजारोगमे मदोन्मत्त हाथी आप्या. ॥ ८१ ॥

तृतीये मङ्गले जाते सचिवः स्वामिने ददे । कोटिमूल्यानलंकारसमुदायान्परःशतान् ॥ ८२॥

अन्वयः—तृतीये मंगले जाते सचिवः स्वामिने कोटि मूल्यान् परःशतान् अलंकार समुदायान् ददे. ॥ ८२ ॥

अर्थः—पछी त्रीजुं मंगल वर्तते छते मंत्रीए प्रभुने क्रोडोना मूल्यना सेंकडोगमे आभूषणोना समूहो आप्या. ॥ ८२ ॥

चतुर्थे मङ्गले पूर्णे प्रभौ मन्त्री वितीर्णवान् । स्वर्णमौक्तिकमाणिक्योत्कराञ्श्रीकेलिपर्वतान् ॥ ८३ ॥

अन्वयः—चतुर्थे मंगले पूर्णे मंत्री श्रीकेलि पर्वतान्, स्वर्ण मौक्तिक माणिक्य उत्करान् प्रभौ वितीर्णवान्. ॥ ८३ ॥

अर्थः—पछी चोथुं मंगल संपूर्ण थये छते मंत्रीए, लक्ष्मीने क्रीडा करवाना पर्वत सरखा सुवर्ण, मोती तथा माणिक्यना समूहो

प्रभुने आप्या. ॥ ८३ ॥

**चतुर्थे मङ्गले पुत्री परकीयेति निष्ठुरे। गीते हर्षाश्रु वध्वम्बा तप्तं जाड्यभिदे दधौ ॥ ८४ ॥**

अन्वयः–चतुर्थे मंगले पुत्री परकीया, इति निष्ठुरे गीते वधू अंबा जाड्य भिदे तप्तं हर्ष अश्रु दधौ. ॥ ८४ ॥

अर्थः–चोथुं मंगल पूर्ण थये छते पुत्री पारकी कहेवाय, एवुं निष्ठूर गीत गवाते छते कन्यानी माता (पोतानी) गेरसमजने (ठंडीने) दूर करवामाटे उष्ण आंसुओने झरवा लागी. ॥ ८४ ॥

**कौतुकमङ्गलोद्गानमथ चक्रे मिथस्तदा। वरवध्वाश्रयैर्योषिज्जनैर्जनितसंमदैः ॥ ८५ ॥**

अन्वयः—अथ तदा जनित संमदैः वर वधू आश्रयैः योषित् जनैः मिथः कौतुक मंगल उद्गानं चक्रे. ॥ ८५ ॥

अर्थः–पछी ते वखते हर्ष उपजावनारी वर अने वहूतरफनी स्त्रीओए साथे मळीने आश्चर्यकारक मंगलीकनां गीतो गावां मांड्यां.

**दानैर्मनोरथातीतैरर्थिनोऽथ कृतार्थयन्। वरवध्वोर्व्यधादिन्द्रः कराञ्चलविमोचनम् ॥ ८६ ॥**

अन्वयः—अथ मनोरथ अतीतैः दानैः अर्थिनः कृतार्थयन् इन्द्रः वर वध्वोः कर अंचल विमोचनं व्यधात्. ॥ ८६ ॥

अर्थः–पछी मनोरथथी पण अधिक दानथी याचकोने खुशी करतांथकां इंद्रे वरवहूनुं हस्तमोचन कर्युं, तथा छेडाछेडी छोडी नाखी.

**कोटिद्रव्यप्रदं देशं पाणिमोक्षणपर्वणि। दत्तवान्स्वामिनोऽमात्यः प्रणिपत्य प्रमोदतः ॥ ८७ ॥**

अन्वयः—अमात्यः प्रमोदतः प्रणिपत्य पाणि मोक्षण पर्वणि कोटि द्रव्य प्रदं देशं स्वामिनः दत्तवान्. ॥ ८७ ॥

अर्थः—पछी ते मंत्रीए हर्षथी नमस्कार करीने हस्तमोचनने अवसरे क्रोड द्रव्यनी किम्मतनो देश प्रभुने आप्यो. ॥ ८७ ॥

हावभावभवद्भङ्गीसंगीतप्रभुकीर्तयः । स्वस्वहर्षैरथानृत्यन्सुरासुरनरस्त्रियः ॥ ८८ ॥

अन्वयः—अथ हाव भाव भवत् भंगी संगीत प्रभु कीर्तयः, सुर असुर नर स्त्रियः स्व स्व हर्षैः अनृत्यन्. ॥ ८८ ॥

अर्थः—पछी हावभावथी अनेक प्रकारे गायेली छे प्रभुनी कीर्ति जेओए, एवी देव, दानव, तथा मनुष्योनी स्त्रीओ पोतपोताना हर्षथी नाचाव लागी. ॥ ८८ ॥

विहितातुल्यमङ्गल्यः पत्न्या सह महोत्सवैः । आरुह्यैरावणं नाथः स्वस्थानार्थमथाचलत् ॥ ८९ ॥

अन्वयः–अथ विहित अतुल्यः मंगल्यः नाथः पत्न्या सह ऐरावणं आरुह्य महोत्सवैः स्वस्थान अर्थ अचलत्. ॥ ८९ ॥

अर्थः–पछी करेल छे अनुपम मंगलीक जेणे एवा ते प्रभु स्त्री सहित ऐरावण हाथीपर चडीने महोत्सव सहित पोताना स्थानप्रते चालवा लाग्या. ॥ ८९ ॥

एति पञ्चमहाशब्दैः सप्रियः प्रभुरित्यथ । औत्सुक्यापूर्णशृङ्गारा दधावुर्नागराङ्गनाः ॥ ९० ॥

अन्वयः–अथ सप्रियः प्रभुः पंच महाशब्दैः एति, इति औत्सुक्य अपूर्ण शृंगाराः नागर अंगनाः दधावुः. ॥ ९० ॥

अर्थः–हवे ( पोतानी ) स्त्रीसहित प्रभु पांचे जातना वाजित्रोना महान शब्दो सहित आवे छे, ए रीतनी उत्सुकताथी अधुरा शृंगारवाळी नगरनी स्त्रीओ ( त्यां ) दोडती आवी. ॥ ९० ॥

उत्तरीयं करे कापि कुर्वती सत्वरागमत् । स्वामिनो न्युञ्छनं कर्तुमिवाद्भुतवपुःश्रियः ॥ ९१ ॥

अन्वयः—अद्भुत वपुः श्रियः स्वामिनः न्युछनं कर्तुं इव, का अपि करे उत्तरीयं कुर्वती सत्वरा आगमत्. ॥ ९१ ॥

अर्थः—शरीरनी अद्भुत शोभावाळा प्रभुनुं जाणे न्युंछन करवामाटे होय नही ! तेम कोइक स्त्री हाथमांज साडी लेइने उतावळथी (त्यां) आवी. ॥ ९१ ॥

अताडङ्कोऽथ ताडङ्की रम्यः कर्ण इति प्रभुम् । सुकर्णी प्रष्टुकामेव काप्यागादेककुण्डला ॥ ९२ ॥

अन्वयः—अताडंकः अथ ताडंकी कर्णः रम्यः ? इति प्रभुं प्रष्टुकामा इव का अपि सुकर्णी एक कुंडला आगात्. ॥ ९२ ॥

अर्थः—कुंडलविनानो के कुंडलवाळो कर्ण मनोहर लागे छे ? एम प्रभुने जाणे पूछवानी इच्छावाळी होय नही ! एम कोइक उत्तम कर्णवाळी स्त्री एकज कुंडल पेहेरीने त्यां आवी हती. ॥ ९२ ॥

कस्तूर्यालिप्य काप्यास्यं रभसा चन्दनैः शिरः । शृङ्गारोऽधः शमस्तूच्चैरितीवेष्टं विभोर्व्यधात् ॥ ९३ ॥

अन्वयः—शृंगारः अधः, तु शमः उच्चैः, इति इव का अपि रभसा कस्तूर्या आस्यं, चंदनैः शिरः आलिप्य विभोः इष्टं व्यधात्.

अर्थः—शृंगाररस नीचे छे, अने शांतरस उंचे छे, जाणे एम जाहेर करवामाटे होय नही ! तेम कोइक स्त्रीए उतावळथी कस्तूरीवडे मुखपर, अने चंदनवडे मस्तकपर लेपन करीने प्रभुने मनगमतुं कर्युं हतुं. ॥ ९३ ॥

नार्हतः प्रतिमः कोऽपीत्यर्थे काप्यभिमानिनी । कृष्टसर्पकरेवागाद्वेणीगुम्फनतत्परा ॥ ९४ ॥

अन्वयः–अर्हतः प्रतिमः कः अपि न, इति अर्थे का अपि अभिमानिनी, कृष्ट सर्प करा इव वेणी गुंफन तत्परा आगात्. ॥९४॥

अर्थः–अरिहंतसमान कोइ पण नथी, एवुं जणाववाने कोइक अभिमानी स्त्री, जाणे हाथमां सर्प पकडीने आवी होय! तेम चोटलो गुंथती गुंथती त्यां आवी हती. ॥ ९४ ॥

**औत्सुक्याद्यावकभ्रान्त्या काप्यधादधरेऽञ्जनम् । ज्ञापयन्तीव शृङ्गाररसपूरावधिं विभोः ॥ ९५ ॥**

अन्वयः—का अपि शृंगाररस पूर अवधिं विभोः ज्ञापयंती इव, औत्सुक्यात् यावक भ्रांत्या अधरे अंजनं अधात्. ॥ ९५ ॥

अर्थः–कोइक स्त्री तो शृंगाररसना समूहनी अवधि जाणे प्रभुने जणावती होय नही! तेम उतावळथी अळतानी भ्रांतिथी तेणीए होठपर अंजन धारण कर्युं हतुं. ॥ ९५ ॥

**कापि कण्ठोचिते माल्ये त्वरावेशात्करस्थिते । आगादाज्ञेव पुष्पेषोरस्त्रपाणिः पुरः प्रभोः ॥ ९६ ॥**

अन्वयः–का अपि अस्त्र पाणिः पुष्प इषोः आज्ञा इव, त्वरा आवेशात् कंठ उचिते माल्ये कर स्थिते प्रभोः पुरः आगात्.

अर्थः–वळी कोइक स्त्री तो जाणे हाथमां धारण करेलां शस्त्रवाळी (साक्षात्) कामदेवनी आज्ञा होय नही! तेम उतावळना आवेशथी कंठमां पहेरवानी पुष्पमाळाने हाथमांज पकडीने प्रभुनी पासे आवी. ॥ ९६ ॥

**त्वराविस्मृतहारापि वैरूप्यं कापि नाप यत् । तच्छ्रियं सुदती स्वामिवीक्षाहर्षस्मितैर्दधौ ॥ ९७ ॥**

अन्वयः–का अपि सुदती, त्वरा विस्मृत हारा अपि वैरूप्यं न आप, यत् स्वामि वीक्षा हर्षस्मितैः तत् श्रियं दधौ. ॥ ९७ ॥

अर्थः—कोइक स्त्री तो उतावळथी हार पेहेरवानुं भूली जवा छतां पण अशोभाने धारण करती नहोती, केमके प्रभुने जोवाना हर्षथी थयेलां हास्यवडे ते हारनी शोभाने धारण करती हती. ॥ ९७ ॥

**इत्थमानन्दसंदर्भं पुरे बिभ्रदथ प्रभुः । सप्रियः प्राविशत्सौधं योगी शुद्धं लयं यथा ॥ ९८ ॥**

अन्वयः—अथ इत्थं पुरे आनंद संदर्भं बिभ्रत् प्रभुः, यथा योगी शुद्धं लयं, ( तथा ) सप्रियः सौधं प्राविशत्. ॥ ९८ ॥

अर्थः—हवे एरीते नगरमां आनंदना उभराने धारण करनारा प्रभु, योगी जेम निर्मल ध्यानमां लीन थाय, तेम प्रियासहित ते राजमहेलमां दाखल थया. ॥ ९८ ॥

**प्रभुं प्रणम्य रम्यास्यां जयामापृच्छ्य भक्तितः । परिस्पन्दकृतोल्लासः शक्रः स्वावासमासदत् ॥ ९९ ॥**

अन्वयः—शक्रः भक्तितः प्रभुं प्रणम्य, रम्य आस्यां जयां आपृच्छ्य, परिस्पंद कृत उल्लासः स्व आवासं आसदत्. ॥ ९९ ॥

अर्थः—पछी इन्द्र पण भक्तिथी प्रभुने नमीने, तथा आनंदित मुखवाळी जयाराणीनी आज्ञा लेइने, आनंदथी उल्लासित थयोथको पोताना स्थानमां गयो. ॥ ९९ ॥

**सुवर्णवज्रमाणिक्यमौक्तिकालंकृतीः पराः । पद्मावत्यै ददौ संख्यातीताः प्रभुपिता ततः ॥ ६०० ॥**

अन्वयः—ततः प्रभु पिता पराः संख्या अतीताः सुवर्ण वज्र माणिक्य मौक्तिक अलंकृतीः पद्मावत्यै ददौ. ॥ ६०० ॥

अर्थः—पछी प्रभुना पिताजीए बीजा असंख्याता सुवर्ण, हीरा माणिक्य तथा मोतीनां आभूषणो पद्मावतीने आप्यां. ॥ ६०० ॥

अशनांशुकताम्बूलालंकारादिप्रदानतः । विवाहोऽभूत्तथान्योन्यं नोपमापि यथा जने ॥ १ ॥

अन्वयः–अन्योन्यं अशन अंशुक तांबूल अलंकार आदि प्रदानतः तथा विवाहः अभूत्, यथा जने उपमा अपि न. ॥ १ ॥

अर्थः–परस्पर भोजन, वस्त्र, तांबूल तथा आभूषणो आदिकना दानथी ते एवो तो विवाह थयो के, जेनी जगतमां उपमा पण मळी शकती नथी. ॥ १ ॥

लीलाविलासभूपालः स्वर्णाश्वेभरथांशुकैः । सन्मान्य वसुपूज्येन स्वदेशाय व्यसृज्यत ॥ २ ॥

अन्वयः—वसुपूज्येन लीलाविलास भूपालः स्वर्ण अश्व इभ रथ अंशुकैः सन्मान्य स्वदेशाय व्यसृज्यत. ॥ २ ॥

अर्थः—पछी ते वसुपूज्यराजाए लीलाविलास राजाने, सुवर्ण, घोडा, हाथी, रथ तथा वस्त्रोथी सत्कार करीने पोताना देशमां जवामाटे रजा आपी. ॥ २ ॥

ततः श्रीवासुपूज्योऽसौ ज्ञानत्रितयदृष्टिभिः । दृष्टभूतभवद्भाविभावोऽप्यभ्रान्तिभागपि ॥ ३ ॥
भवाब्धेर्जनमुद्धर्तुमात्तयत्नोऽपि चेतसा । मोक्षलक्ष्मीपरीरम्भारम्भे संरम्भवानपि ॥ ४ ॥
परं भोगफलं कर्म भोक्तव्यमिति निश्चयात् । किंचिच्चकार संसारव्यापारकरणं मनः ॥ ५ ॥

अन्वयः—ततः ज्ञान त्रितय दृष्टिभिः दृष्ट भूत भवत् भावि भावः अपि, अभ्रांतिभाक् अपि असौ श्रीवासुपूज्यः, ॥ ३ ॥ चे-

सान्वय भाषांतर ॥११३७॥

तसा भव अब्धेः जन उद्धर्तुं आत्त यत्नः अपि, मोक्ष लक्ष्मी परीरंभ आरंभे संरंभवान् अपि, ॥ ४ ॥ परं भोग फलं कर्म भोक्तव्यं इति निश्चयात् किंचित् संसार व्यापार करणं मनः चकार. ॥ ५ ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी त्रण ज्ञानरूपी दृष्टिओवडे करीने जोयेल छे, भूत, वर्तमान तथा भविष्यकाळना भावो जेणे एवा, तथा भ्रांतिविनाना एवा पण ते श्रीवासुपूज्यप्रभु, ॥ ३ ॥ मनथी संसारसागरमांथी लोकोनो उद्धार करवाने प्रयत्नवान छतां, अने मोक्षलक्ष्मीनुं आलिंगन करवाने तैयार छतां पण, ॥ ४ ॥ भोगावलीकर्मनुं फल भोगववुंज जोइशे, एवा निश्चयथी कंइक सांसारिक व्यवहार करवानुं मन करवा लाग्या. ॥ ५ ॥ त्रिभिर्विशेषकं ॥

कदाचिदद्भुतारामे कदाचित्सिन्धुरोधसि । कदाचित्केलिशैलेषु कदाचिच्चित्रसद्मसु ॥ ६ ॥
कदाचिद्वनितोल्लासिहल्लीसकविलोकने । कदाचित्किन्नरीतारगीताकर्णनकौतुके ॥ ७ ॥
कदाचिन्मघवादिष्टसुरीघटितनाटके । स्वामी विनिर्ममे कर्मनिर्जरां निर्जरैर्नुतः ॥ ८ ॥ त्रिभिर्विशेषकम् ॥

अन्वयः—कदाचित् अद्भुत आरामे, कदाचित् सिंधु रोधसि, कदाचित् केलि शैलेषु, कदाचित् चित्र सद्मसु, ॥६॥ कदाचित् वनिता उल्लासि हल्लीसक विलोकने, कदाचित् किन्नरी तार गीत आकर्णन कौतुके, ॥ ७ ॥ कदाचित् मघवा आदिष्ट सुरी घटित नाटके, निर्जरैः नुतः स्वामी कर्म निर्जरां विनिर्ममे. ॥ ८ ॥ त्रिभिर्विशेषकं ॥

अर्थः—कोइ दिवस मनोहर बगीचामां, कोइ दिवस नदी किनारे, कोइ दिवस क्रीडा माटेना पर्वतोपर, कोइ दिवस चित्रशाला-

ओमां ॥ ६ ॥ कोइ दिवस स्त्रीओनी आनंदयुक्त रासक्रीडा जोवामां, कोइक दिवस किन्नरीओनां मनोहर गीता सांभळवाना कौतुकमां, ॥ ७ ॥ तो कोइ दिवस इन्द्रे आज्ञा करेली देवांगनाओए भजवेलां नाटकमां, देवोथी स्तुति करायेला ते भगवान पोताना भोगावली कर्मोनी निर्जरा करवा लाग्या. ॥ ८ ॥ त्रिभिर्विशेषकं ॥

**जगन्मित्रस्य मित्राणि विश्वसेव्यस्य सेवकाः । विशेषज्ञा विशेषेणाभवन्भूपाः शतानि षट् ॥९॥**

अन्वयः—जगत् मित्रस्य, विश्व सेव्यस्य, विशेषज्ञाः षट् शतानि भूपाः विशेषेण मित्राणि सेवकाः अभवन्. ॥ ९ ॥

अर्थः—जगतना मित्र, अने जगतने सेववालायक एवा ते प्रभुना छसो विद्वान् राजाओ विशेषप्रकारे मित्रो अने सेवको थया.

**आसने क्रीडने यानेऽवस्थाने शयनेऽशने । पार्श्वे एवार्हतस्तेऽस्थुरङ्गानि भविनो यथा ॥ १० ॥**

अन्वयः—यथा भविनः अंगानि (तथा) ते आसने, क्रीडने, याने, अवस्थाने, शयने, अशने अर्हतः पार्श्वे एव अस्थुः. ॥

अर्थः–जेम संसारी जीवोनां अंगो साथेज रहे छे, तेम ते राजाओ बेसवामां, क्रीडामां, जवामां, रहेवामां, सुवामां, तथा भोजनमां प्रभुनी पासेज रहेता हता. ॥ १० ॥

**ते निर्मलगुणाः स्वाम्यासत्तेर्जाताः सुदर्शनाः । स्वर्णकेतकसांगत्याद्यथामोदोद्धटाः पटाः ॥ ११ ॥**

अन्वयः–स्वर्ण केतक सांगत्यात् पटाः यथा आमोद उद्धटाः, (तथा) ते स्वामि आसत्तेः निर्मल गुणाः सुदर्शनाः जाताः.

अर्थः—सोनेरी केवडाना संगथी वस्त्रो जेम अति सुगंधवाळां थाय छे, तेम ते राजाओ प्रभुनी सोबतथी निर्मल गुणोवाळा तथा

उत्तम सम्यक्त्वधारी थया. ॥ ११ ॥

एतानद्भुतसत्त्वांश्च प्रभुस्तत्त्वानि बोधयन् । सुखेन गमयामास वासरान्प्रीतिभासुरान् ॥ १२ ॥

अन्वयः—च अद्भुत सत्त्वान् एतान् तत्त्वानि बोधयन् प्रभुः प्रीति भासुरान् वासरान् सुखेन गमयामास. ॥ १२ ॥

अर्थः—वळी अद्भुत पराक्रमवाळा ते राजाओने तत्त्वोनो प्रतिबोध आपता प्रभु आनदथी मनोहर दिवसोने सुखे समाधे व्यतीत करवा लाग्या. ॥ १२ ॥

अन्यदा संमदायेशो मातापित्रोर्जनस्य च । लीलारामं समित्रोऽगाद्वसन्तोत्सवमीक्षितुम् ॥ १३ ॥

अन्वयः—अन्यदा मातापित्रोः जनस्य च संमदाय समित्रः ईशः वसंत उत्सवं ईक्षितुं लीला आरामं अगात्. ॥ १३ ॥

अर्थः—पछी एक दिवसे मातापिताने तथा लोकोने आनंद उपजाववाने मित्रोसहित ते प्रभु वसंतऋतुनो महोत्सव जोवाने क्रीडा करवाना बगीचामां गया. ॥ १३ ॥

वल्गत्तिलककिञ्जल्कद्रवोर्वीसेककर्मभिः । सिन्धुवारसुमस्फारमुक्तास्वस्तिकराजिभिः ॥ १४ ॥

उड्डीनाम्रपरागोर्मिप्रसरद्गन्धवृष्टिभिः । क्रीडाद्रिनिर्झरोद्गारतूर्यताररतरस्वनैः ॥ १५ ॥

मरुत्कम्पितकङ्केल्लिवल्लीपल्लवनर्तनैः । बकुलामोदमत्तालिश्रेणिवेणुमृदुस्वनैः ॥ १६ ॥

कलकण्ठीकुहूकारपञ्चमोच्चारगीतिभिः । कूजत्कीरमहाबन्दिसंदोहजयघोषणैः ॥ १७ ॥
चारुचम्पकविस्मेरपुष्पारात्रिकमङ्गलैः । मलयानिलसंश्लिष्टपाटलाञ्चलवीजनैः ॥ १८ ॥
किंशुकाञ्जनवासन्तीविचित्रन्युञ्छनांशुकैः । विशतो विश्वनाथस्योद्यानश्रीरुत्सवं व्यधात् ॥ १९ ॥

अन्वयः—वल्गत् तिलक किंजल्क द्रव उर्वी सेक कर्मभिः, सिंधुवार सुम स्फार मुक्ता स्वस्तिक राजिभिः, ॥ १४ ॥ उड्डीन आम्र पराग ऊर्मि प्रसरत् गंध वृष्टिभिः, क्रीडा अद्रि निर्झर उद्गार तूर्य तारतर स्वनैः, ॥ १५ ॥ मरुत् कंपित कंकेल्लि वल्ली पल्लव नर्तनैः, बकुल आमोद मत्त अलि श्रेणि वेणु मृदु स्वनैः, ॥ १६ ॥ कल कंठी कुहूकार पंचम उच्चार गीतिभिः, कूजत् कीर महा बंदि संदोह जय घोषणैः, ॥ १७ ॥ चारु चंपक विस्मेर पुष्प आरात्रिक मंगलैः, मलय अनिल संश्लिष्ट पाटल अंचल वीजनैः, ॥ ॥ १८ ॥ किंशुक अंजन वासंती विचित्र न्युंछन अंशुकैः, उद्यान श्रीः विशतः विश्वनाथस्य उत्सवं व्यधात् . ॥ १९ ॥

अर्थः—डोलता तिलकवृक्षना परागना रसवडे पृथ्वीपर छटकाववानुं कार्य करीने, सिंधुडांनां फुलोरूपी विस्तारेला मोतीओना स्वस्तिकोनी श्रेणिथी, ॥१४॥ उडता आंबाना मोरना मोजांओनी विस्तार पामती गंधोदकनी वृष्टिथी, क्रीडाकरवाना पर्वतोमांथी झरता झरणाओना शब्दोरूपी वाजिंत्रोना महान शब्दोथी, ॥१५॥ पवनथी कंपेली अशोकवल्लीना किशलयोना नाचथी, बकुलोनी सुगंधिथी उन्मत्त थयेला भमराओनी श्रेणिरूपी वांसलीओना मधुर शब्दोथी, ॥ १६ ॥ कोयलोना टहुकारोना पंचम रागना गीतोथी, बोलता शुकोरूपी महान बंदिओना समूहोना जयजय शब्दोथी, ॥ १७ ॥ मनोहर चंपाना प्रफुल्लित पुष्पोरूपी आरती अने मंगल-

दीपकोथी, मलयाचलना वायुथी स्पर्शित थयेली गुलाबनी पांखडीओरूपी वींझणाओथी, ॥ १८ ॥ केसुडां, अंजन, तथा वासंतीरूपी विचित्र न्युंछन करवानां वस्त्रोथी, ते बगीचानी लक्ष्मीए दाखल थता प्रभुनो महोत्सव कर्यो. ॥ १९ ॥

**लीलारामे प्रसर्पन्ती स्वभावतरला विभोः । प्रसादविशदा दृष्टिः सुधावृष्टिरिवाबभौ ॥ २० ॥**

अन्वयः—लीला आरामे प्रसर्पंती, स्वभाव तरला, प्रसाद विशदा विभोः दृष्टिः सुधा दृष्टिः इव आबभौ. ॥ २० ॥

अर्थः—क्रीडा करवाना ते बगीचामां विस्तार पामती, स्वभावथीज चपल, अने मेहेरबानीथी मनोहर देखाती, एवी ते प्रभुनी दृष्टि अमृतनी वृष्टिनीपेठे शोभती हती. ॥ २० ॥

**अथासीनः प्रभुः पोठे रक्ताशोकतरोस्तले । स्वकायकान्तिभिस्तन्वन्नास्तम्बात्तस्य पल्लवान् ॥ २१ ॥**

अन्वयः—अथ स्वकाय कांतिभिः आस्तंबात् तस्य पल्लवान् तन्वन् प्रभुः रक्त अशोक तरोः तले पीठे आसीनः॥ २१ ॥

अर्थः—पछी पोताना शरीरनी कांतिवडे छेक थडथी मांडीने ते अशोकवृक्षना पल्लवोने विस्तारता एवा ते प्रभु, लाल अशोकवृक्षने तलीए बेठा. ॥ २१ ॥

**कुसुमाभरणैर्भूरि भूषितोऽभाद्विभुस्तदा । अदीनशारदीनाभ्रश्रेणिर्मणिगिरिर्यथा ॥ २२ ॥**

अन्वयः—तदा कुसुम आभरणैः भूरि भूषितः विभुः, अदीन शारदीन अभ्र श्रेणिः यथा मणि गिरिः, तथा अभात्. ॥ २२ ॥

अर्थः—ते वखते पुष्पोनां आभूषणोथी अत्यंत विभूषित थयेला प्रभु, शरदऋतुना घटाबंध वादळांओनी श्रेणिओवाळो जेम रोह-

णाचल शोभे, तेम शोभता हता. ॥ २२ ॥

आन्दोलनजलक्रीडाशृङ्गारोद्गारिगीतिभिः । प्रमादिनं जनं वीक्ष्य विभुरेवं व्यचिन्तयत् ॥ २३ ॥

अन्वयः–आंदोलन जलक्रीडा शृंगार उद्गारि गीतिभिः जनं प्रमादिनं वीक्ष्य विभुः एवं व्यचिंतयत्. ॥ २३ ॥

अर्थः–हींचोला, जलक्रीडा, तथा शृंगाररसथी भरेलां गायनोवडे करीने लोकोने मोहमां पडेला जोइने प्रभु एम विचारवा लाग्याके, ॥ २३ ॥

अहो मोहः कियानेष निःशेषज्ञानहानिकृत् । यत्प्रभावादसद्भावाः सद्भावा भविनां हृदि ॥ २४ ॥

अन्वयः—अहो! निःशेष ज्ञान हानिकृत् एषः कियान् मोहः! यत् प्रभावात् भविनां हृदि असत् भावाः सत् भावाः. ॥२४॥

अर्थः—अहो! सर्व ज्ञाननी हानि करनारो आ केटलो मोह छे! के जेना प्रभावथी संसारी जीवोना हृदयमां अशुभ भावो पण शुभ भावरूपे परिणमे छे. ॥ २४ ॥

नारीं पश्यन्ति दोलास्थां विमानान्तः सुरीमिव । न धैर्यध्वंसिनीमन्धाः पाशबद्धां शिलामिमाम् ॥२५॥

अन्वयः–दोलास्थां नारीं विमानांतः सुरीं इव पश्यंति, अंधाः धैर्य ध्वंसिनीं पाश बद्धां इमां शिलां न. ॥ २५ ॥

अर्थः—हिंचोलापर बेठेली स्त्रीने विमानमां बेठेली देवीसरखी जुए छे, परंतु ते मोहांधो, धैर्यनो नाश करनारी, पाशमां बांधेली ते शिलासमान छे, एम जोता नथी. ॥ २५ ॥

स्वं दोलान्दोलितं वेत्ति न पुनर्मुग्धधीर्जनः । किंकर्मायं गतौ नेयः क्वेति धात्रा तुलाधृतम् ॥ २६ ॥

अन्वयः—मुग्ध धीः जनः स्वं दोला आंदोलितं वेत्ति, पुनः न, किंकर्मा अयं? क्व गतौ नेयः? इति धात्रा तुला धृतं. ॥ २६ ॥

अर्थः—मुग्ध बुद्धिवाळो माणस पोताने हींडोळामां हींचोळेलो जाणे छे, परंतु ते एम नथी जाणतो के, कयां कर्मवाळा एवा आने कइ गतिमां लेइजवो? एवा विचारथी विधाताए पोताने त्राजवामां ( तोलवा माटे ) मूक्यो छे. ॥ २६ ॥

जानन्त्यम्भोऽरुणं रागाब्धिवीचीति प्रियेक्षणम् । न प्रमादाग्निदग्धस्य ज्वालां पुण्यौकसो जडाः ॥२७॥

अन्वयः—जडाः अंभः अरुणं प्रिया ईक्षणं राग अब्धि वीचि इति जानंति, प्रमाद अग्नि दग्धस्य पुण्य ओकसः ज्वालां न. ।२७।

अर्थः—मूर्ख माणसो अश्रुजलथी लाल थयेली पोतानी स्त्रीनी आंखने प्रेमसागरना मोजांसरखी जाणे छे, परंतु मोहरूपी अग्निथी बळेलां पुण्यरूपी घरनी ते ज्वालासमान छे, एम नथी जाणता. ॥ २७ ॥

क्रीडाजलकणान्मुक्ताः स्वतनौ मनुते जनः । श्रेयोऽङ्गे विषयैस्तप्ते नैतत्पिटकपेटकम् ॥ २८ ॥

अन्वयः—जनः स्व तनौ क्रीडा जल कणान् मुक्ताः मनुते, विषयैः तप्ते श्रेयः अंगे एतत् पिटक पेटकं न. ॥ २८ ॥

अर्थः—मनुष्य पोताना शरीरपर जलक्रीडाथी चोटेलां जलकणोने मोतीसमान माने छे, परंतु विषयोथी तपेलां कल्याणरूपी शरीरपर थयेलो आ फोल्लाओनो समूह छे, एम जाणतो नथी. ॥ २८ ॥

गीतं कामास्त्रटङ्कार इत्याख्याति जनोऽल्पधीः । न त्वेवं दुर्गतिद्वारकपाटोद्घाटनध्वनिः ॥ २९ ॥

अन्वयः-अल्पधीः जनः गीतं काम अस्त्र टंकार इति आख्याति, तु एवं न, दुर्गति द्वार कपाट उद्घाटन ध्वनिः. ॥ २९ ॥

अर्थः—स्वल्प बुद्धिवाळो मनुष्य (स्त्रीओना) गीतने आ कामदेवना शस्त्रनो टंकारनाद छे, एम कहे छे, परंतु एम नथी जाणतो के, ते तो दुर्गतिना दरवाजाना कमाड उघडवानो अवाज छे. ॥ २९ ॥

**गीतगाने शिरःकम्पः शंसायां तन्यते जडैः । महाप्रमादोऽयमिति निषेधे ज्ञायते न किम् ॥ ३० ॥**

अन्वयः-गीत गाने शंसायां जडैः शिरः कंपः तन्यते, अयं महाप्रमादः, इति निषेधे किं न ज्ञायते ? ॥ ३० ॥

अर्थः-गीतो गाती समये तेनी प्रशंसामाटे मूर्खलोको मस्तक कंपावे छे, परंतु आ तो म्होटो प्रमाद छे, एवीरीतना निषेधमाटे ते शिरःकंपने केम जाणता नथी ? ॥ ३० ॥

**विश्वत्रयसमृद्ध्यापि नाप्यते जन्म मानुषम् । तदित्थं हार्यते व्यर्थमहो मोहो महानिह ॥ ३१ ॥**

अन्वयः-विश्व त्रय समृध्ध्या अपि मानुषं जन्म न आप्यते, तत् इत्थं व्यर्थं हार्यते, अहो ! इह महान् मोहः ॥ ३१ ॥

अर्थः—त्रणे जगतनी ऋद्धिना बदलामां पण मनुष्यजन्म मळी शके तेम नथी, एवा ते आ मनुष्यजन्मने आवीरीते फोकट हारी जाय छे, अहो ! आ जगतमां मोह म्होटो छे. ॥ ३१ ॥

**तदेवं सर्वथा मूढजनप्रौढीकृतो भवः । उचितस्त्यक्तुमेवायं महतामहतात्मनाम् ॥ ३२ ॥**

अन्वयः—तत् एवं सर्वथा भवः मूढ जन प्रौढीकृतः, अहतात्मनां महतां अयं त्यक्तुं एव उचितः. ॥ ३२ ॥

अर्थ –माटे एवीरीते सर्वथा प्रकारे आ संसारने मूर्ख लोकोए म्होटो करेलो छे, तेथीचेतेला महात्माओए तेने तजवोज लायक छे.

**तदद्यापि कियद्भोगफलं कर्मेदमस्ति मे । इति तत्रावधिज्ञानं प्रभुः प्रथितवांस्ततः ॥ ३३ ॥**

अन्वयः—तत् अद्य अपि मे इदं भोग फलं कियत् अस्ति? इति ततः तत्र प्रभुः अवधि ज्ञानं प्रथितवान्. ॥ ३३ ॥

अर्थः–माटे हजु पण मारुं आ भोगावली कर्म केटलुंक छे? एम विचारी त्यारपछी त्यां प्रभुए (पोताना) अवधिज्ञाननो उपयोग दीधो.

**जन्मतो वर्षलक्षेषु गतेष्वष्टादशस्वथ । कर्मभोगफलं भुक्तमिति मत्वावधेस्तदा ॥ ३४ ॥**

**उच्चैर्निःश्रेयसस्थानारोहणैकाधिरोहिणीम् । दीक्षां ग्रहीतुकामोऽभूज्जितकामो जयाङ्गजः ॥ ३५ ॥युग्मम्॥**

अन्वयः—अथ जन्मतः अष्टादशसु वर्ष लक्षेषु गतेषु कर्म भोग फलं भुक्तं, इति तदा अवधेः मत्वा, ॥ ३४ ॥ जित कामः जया अंगज, उच्चैः निःश्रेयस स्थान आरोहण एक अधिरोहिणीं दीक्षां ग्रहीतुकामः अभूत्. ॥ ३५ ॥ युग्मं ॥

अर्थः–हवे जन्मथी अढार लाख वर्षो गयाबाद में भोगावली कर्म भोगवी लीधुं छे, एम ते वखते अवधिज्ञानथी जाणीने ॥३४॥ जितेल छे कामदेवने जेणे एवा ते जयाराणीना पुत्र श्रीवासुपूज्यप्रभु, उंचे रहेलां मोक्षस्थानमां चढवामाटे एक निसरणीसरखी, एवी दीक्षा लेवानी इच्छावाळा थया. ॥ ३५ ॥ युग्मं ॥

**अस्मिन्नवसरे ब्रह्मलोकात्पञ्चमकल्पतः । लोकान्तिकाख्याः सम्यक्त्वपरिणामा महर्द्धिकाः ॥ ३६ ॥**

स्वस्वासनप्रकम्पेन प्रयुक्तावधयः क्षणात् । ज्ञातद्वादशतीर्थेशव्रतकालाः क्रियाविदः ॥ ३७ ॥
सारस्वता अथादित्या वह्नयो वारुणास्तथा । गर्दतोयाश्च तुषिता अव्याबाधाभिधा अपि ॥ ३८ ॥
मरुतोऽरिष्टसंज्ञाश्च नवैते निर्जरव्रजाः । आगत्य स्वामिनं भक्त्या प्रणिपत्य व्यजिज्ञपन् ॥ ३९ ॥

अन्वयः—अस्मिन् अवसरे ब्रह्मलोकात् पंचम कल्पतः सम्यकत्व परिणामाः महर्द्धिकाः लोकांतिक आख्याः, ॥ ३६ ॥ स्व स्व आसन कंपेन क्षणात् प्रयुक्त अवधयः, ज्ञात द्वादश तीर्थ ईश व्रत कालाः, क्रिया विदः, ॥ ३७ ॥ सारस्वताः, अथ आदित्याः, वह्नयः, तथा वरुणाः, च गर्दतोयाः, तुषिताः, अपि अव्याबाध अभिधाः, ॥३८॥ मरुतः, च अरिष्ट संज्ञाः, एते नव निर्जर व्रजाः आगत्य, स्वामिनं भक्त्या प्रणिपत्य व्यजिज्ञपन्. ॥ ३९ ॥ चतुर्भिः कलापकं ॥

अर्थः—पछी ते वखते ब्रह्मलोक नामना पांचमा देवलोकथी समकीतना परिणामवाळा, अने महान् समृद्धिवाळा लोकांतिक नामना देवो, ॥ ३६ ॥ पोतपोतानां आसनो कंपवाथी क्षणवारमां अवधिज्ञान प्रयुंजवाथी बारमा श्रीवासुपूज्यनामना तीर्थकरनो दीक्षा लेवानो समय जाणीने, क्रिया जाणनारा, ॥ ३७ ॥ सारस्वत, आदित्य, वह्नि, वरुण, गर्दतोय, तुषित, तथा अव्याबाधनामना तेमज मरुत्, अने अरिष्टनामना, एम ते नव जातना देवोना समूहो त्यां आवीने, तथा प्रभुने भक्तिथी नमीने विनववा लाग्या के, ॥ ३८ ॥ चतुर्भिः कलापकं ॥

जीवान्भवाम्बुधौ मग्नानुद्धर्तुमहतं परैः । शुद्धधर्ममयं तीर्थं तीर्थनाथ प्रवर्तय ॥ ४० ॥

अन्वयः-(हे) हे तीर्थनाथ! भव अंबुधौ मग्नान् जीवान् उद्धर्तुं. परैः अहतं शुद्ध धर्ममयं तीर्थं प्रवर्तय? ॥ ४० ॥

अर्थः-हे तीर्थनाथ! संसाररूपी समुद्रमां डुबेला जीवोनो उद्धार करवामाटे, बीजाओथी पराभव नही पामेला, एवा निर्मल धर्ममय तीर्थने आप प्रवर्तावो? ॥ ४० ॥

**अथैवं विज्ञपय्यैते ज्ञातकृत्यमपि प्रभुम्। प्रणिपत्य यथास्थानं जग्मुर्मुदितमानसाः ॥ ४१ ॥**

अन्वयः-अथ ज्ञात कृत्यं अपि प्रभुं एवं विज्ञपय्य, प्रणिपत्य मुदित मानसाः एते यथा स्थानं जग्मुः. ॥ ४१ ॥

अर्थः—पछी कृत्यने जाणनारा एवा पण ते प्रभुने एवीरीते विनवीने, तथा नमीने मनमां हर्ष पामेला ते लोकांतिक देवो पोतपोताने स्थानके गया. ॥ ४१ ॥

**लीलारामादथ स्वामी कामी दीक्षापरिग्रहे। आगत्य स्वालयं मातापित्रोः पार्श्वेऽभ्यधादिति ॥ ४२ ॥**

अन्वयः-अथ दीक्षा परिग्रहे कामी स्वामी लीला आरामात् स्व आलयं आगत्य मातापित्रोः पार्श्वे इति अभ्यधात्. ॥ ४२ ॥

अर्थः—पछी दीक्षा लेवाने इच्छता एवा ते प्रभु क्रीडा करवाना बगीचामांथी पोताने घेर आवीने मातापितानी पासे एम कहेवा लाग्या के, ॥ ४२ ॥

**मातस्तात न मे स्वान्तं लीलारामे धृतिं दधौ। ततो मामनुजानीतमात्मारामाय संप्रति ॥ ४३ ॥**

अन्वयः—(हे) मातः! (हे) तात! मे स्वांतं लीला आरामे धृतिं न दधौ, ततः मां संप्रति आत्म आरामाय अनुजानीत?

अर्थः—हे माताजी ! हे पिताजी ! मारुं मन क्रीडा करवाना बगीचामां हवे चोंटतुं नथी, माटे मने हवे आत्मज्ञानमां रमण करवामाटे आज्ञा आपो ? ॥ ४३ ॥

**तावार्जवोज्ज्वलस्वान्तावूचतुः सर्ववेदिनम् । वत्सात्मीयः क आरामो यत्र ते रमते मनः ॥ ४४ ॥**

अन्वयः—आर्जव उज्ज्वल स्वांतौ तौ सर्व वेदिनं ऊचतुः, हे वत्स ! आत्मीयः आरामः कः ? यत्र ते मनः रमते. ॥ ४४ ॥

अर्थः—सरलताथी उज्ज्वल हृदयवाळा एवा तेओ ते सर्वज्ञ प्रभुने कहेवा लाग्या के, हे वत्स ! ते आत्मीय आराम कयो ? के जेमां तारुं मन रमी रह्युं छे. ॥ ४४ ॥

**मातस्तात न भाषेऽहं स्वं कंचिद्भूरुहां चयम् । यद् भवेत् स्वो न कायोऽपि का कथा शेषवस्तुषु॥४५॥**

अन्वयः—(हे) मातः ! (हे) तात ! कंचित् भूरुहां चयं स्वं न भाषे, यत् कायः अपि स्वः न भवेत्, शेष वस्तुषु का कथा ?

अर्थः—हे माताजी ! हे पिताजी ! हुं कंइ वृक्षोना समूहरूप आरामने पोतानो नथी कहेतो, केमके आ शरीर पण पोतानुं नथी, तो पछी बाकीनी बीजी वस्तुओनी शुं वात करवी ? ॥ ४५ ॥

**आत्माराममम्मुं वच्मि कषायविषयोज्झितम् । इष्टानिष्टे समं शुद्धध्येयबद्धलयं मनः ॥ ४६ ॥**

अन्वयः—कषाय उज्झितं, इष्ट अनिष्टे समं, शुद्ध ध्येय बद्ध लयं अमुं मनः आत्मारामं वच्मि. ॥ ४६ ॥

अर्थः—कषाय अने विषयोथी रहित, इष्ट अनिष्टमां समभाववाळुं, अने निर्मल ध्याननी लीनतावाळुं ते आ मन, तेने हुं आत्मा-

राम कहुं छुं. ॥ ४६ ॥

**तत्रासक्तं मम स्वान्तं प्राप्यत्ते तत्तु दीक्षया । ततो मामनुमन्येथामस्यै यद्यस्मि वल्लभः ॥ ४७ ॥**

अन्वयः—मम स्वांतं तत्र आसक्तं, तत् तु दीक्षया प्राप्यते, ततः यदि वल्लभः अस्मि, अस्यै मां अनुमन्येथां ? ॥ ४७ ॥

अर्थः—अने मारुं हृदय तेमां चोंटेलुं छे, अने ते तो दीक्षावडे प्राप्त थाय छे, माटे जो हुं (तमोने) व्हालो होउं, तो मने ते दीक्षा लेवामाटे आज्ञा आपो ? ॥ ४७ ॥

**आकर्ण्य कर्णकटुकं पटुकं तद्वचः प्रभोः । जननीजनकौ जातमूर्छावपततां क्षितौ ॥ ४८ ॥**

अन्वयः—कर्ण कटुकं प्रभोः पटुकं तत् वचः आकर्ण्य जननी जनकौ जात मूर्छौ क्षितौ अपततां. ॥ ४८ ॥

अर्थः—कर्णने कडवुं लागे एवुं प्रभुनुं ते हुशीयारी भरेलुं वचन सांभळीने ( तेमना ) माता पिता तो मूर्छित थइने पृथ्वीपर पडी गया. ॥ ४८ ॥

**ततः शीतोपचारेण चिरेणाञ्चितचेतनौ । कल्पितानेकसंकल्पावनल्पं तावजल्पताम् ॥ ४९ ॥**

अन्वयः—ततः शीत उपचारेण चिरेण अंचित चेतनौ, कल्पित अनेक संकल्पौ तौ अनल्पं अजल्पतां. ॥ ४९ ॥

अर्थः—पछी ठंडा उपचारथी घणे समये चेतन आव्याबाद (मनमां) अनेक विकल्पो करता थका तेओ घणी घणी रीते कहेवा लाग्या के, ॥ ४९ ॥

त्वत्तः सर्वजनीनात्किं दुःसहास्मासु वागभूत् । यद्वा वत्स कदाप्यब्दादपि क्वापि पतेत्तडित् ॥ ५० ॥

अन्वयः–(हे) हे वत्स ! सर्वजनीनात् त्वत्तः अस्मासु दुस्सहा वाक् किं अभूत् ? यद्वा कदापि अब्दात् अपि क्वापि तडित् पतेत्.

अर्थः—हे वत्स ! सर्व प्रकारे आनंद आपनारा एवा तारातरफथी पण अमाराप्रते आवी असह्य वाणी केम थइ ? अथवा कोइक समये मेघमांथी पण क्यांक वीजळी पडे छे. ॥ ५० ॥

नवे वयसि दीक्षार्थमित्थं जल्पन्भवानभूत् । प्रातर्वैकालिकं याचन्निव मुग्धास्य हास्यकृत् ॥ ५१ ॥

अन्वयः–( हे पुत्र! ) इत्थं नवे वयसि दीक्षार्थं जल्पन् भवान् प्रातः वैकालिकं याचन् इव मुग्धास्य हास्यकृत् अभूत्. ॥५१॥

अर्थः–हे पुत्र! आरीते युवान वयमां दीक्षामाटे बोलतो एवो तुं, प्रभातमां वाळु मागनार बाळकनी पेठे हांसीने पात्र थाय छे.

एकादशभिरर्हद्भिः श्रीनाभेयपुरःसरैः । राज्यं विधाय जगृहे व्रतं तेऽपि शिवं ययुः ॥ ५२ ॥

अन्वयः–श्रीनाभेय पुरस्सरैः एकादशभिः अर्हद्भिः राज्यं विधाय व्रतं जगृहे, ते अपि शिवं ययुः. ॥ ५२ ॥

अर्थः–श्रीऋषभदेव आदिक अग्यार तीर्थंकरोए राज्य भोगवीने दीक्षा लीधी छे, अने तेओ पण मोक्षे गया छे. ॥ ५२ ॥

त्वं जिनो द्वादशस्तावद्गमिष्यसि शिवं ध्रुवम् । तदूर्ध्वं तु गतिर्नेति राज्यं प्राज्यसुखं भज ॥ ५३ ॥

अन्वयः–त्वं तावत् द्वादशः जिनः, ध्रुवं शिवं गमिष्यसि, तत् ऊर्ध्वं तु गतिः न, इति प्राज्य सुखं राज्यं भज ? ॥ ५३ ॥

अर्थः–वळी तुं पण बारमो तीर्थंकर छो, अने तेथी निश्चयें तुं मोक्षे जइश, अने तेथीउंची तो कोइ गति नथी, माटे हमणा मनो-

हर सुखवाळुं राज्य भोगव? ॥ ५३ ॥

**अथ दन्तांशुमुक्तास्त्रग्भूषिता भारती परा । वितेने श्रीजिनेन्द्रेण मातापित्रोः प्रबोधिनी ॥ ५४ ॥**

अन्वयः—अथ श्रीजिनेंद्रेण माता पित्रोः प्रबोधिनी, दंत अंशु मुक्तास्रग् भूषिता परा भारती वितेने. ॥ ५४ ॥

अर्थः–पछी श्रीजिनेश्वर प्रभु ( पोताना ) माता पिताने प्रतिबोध करनारी, अने दांतोना किरणोरूपी मोतीओनी माळाथी विभूषित थयेली उत्तम वाणी बोल्या के, ॥ ५४ ॥

**सत्यं यद्दुःसहा मद्वाक् परं मोहवृतात्मनाम् । यथा व्यथाकरी विश्वे नेत्ररुग्नेत्ररोगिणाम् ॥ ५५ ॥**

अन्वयः–यथा विश्वे नेत्र रोगिणां नेत्र रुग् व्यथा करी, (तथा) सत्यं, यद् मद्वाक् दुस्सहा, परं मोह वृत आत्मनां. ॥ ५५ ॥

अर्थः–जेम आ जगतमां आंखना रोगीओने आंखनी व्याधि दुःख उपजावनारी होय छे, तेम सत्य छे के, जे मारी वाणी आपने असह्य लागे छे, परंतु मोहमुग्ध प्राणीओने तेम थाय छे. ॥ ५५ ॥

**नवे वयसि या दीक्षा नैव हास्याय सा सताम् । न हि पीयूषपानेऽपि प्रस्तावः प्रेक्ष्यते बुधैः ॥ ५६ ॥**

अन्वयः—नवे वयसि या दीक्षा, सा सतां हास्याय न एव, हि बुधैः पीयूष पाने प्रस्तावः अपि न प्रेक्ष्यते. ॥ ५३ ॥

अर्थः—वळी युवान वयमां जे दीक्षा लेवी, ते सज्जनो माटे हांसीने पात्र थतीज नथी, केमके डाह्या माणसो अमृतपान करवामाटे कंइ अवसर पण जोता नथी. ॥ ५६ ॥

भोक्तुं भोगफलं कर्म राज्यं चक्रे जिनैः पुरा । तदेवमेव मे छिन्नं तन्न राज्ये कृते फलम् ॥ ५७ ॥

अन्वयः–भोगफलं कर्म भोक्तुं पुरा जिनैः राज्यं चक्रे, मे तत् एवं एव छिन्नं, तत् राज्ये कृते फलं न. ॥ ५७ ॥

अर्थः—भोगावली कर्म भोगववाने पूर्वना जिनेश्वरोए राज्य करेलुं छे, अने मारुं ते कर्म एमज छेदाइ गयुं छे, माटे हवे राज्य करवाथी (मने) कंइंज फल नथी. ॥ ५७ ॥

राज्येऽपि न सुखं यस्माद्दुःखमैश्वर्यमानतः । रसाधिक्यानुमानेन व्याधयः पीडयन्ति यत् ॥ ५८ ॥

अन्वयः–राज्ये अपि सुखं न, यस्मात् ऐश्वर्य मानतः दुःखं, यत् रस आधिक्य अनुमानेन व्याधयः पीडयंति. ॥ ५८ ॥

अर्थः—वळी राज्यमां पण कंइं सुख नथी, केमके ऐश्वर्यना प्रमाणमां दुःख उत्पन्न थाय छे, कारणके अधिक रस भोगववाना अनुमानमुजब व्याधिओ दुःख आपे छे. ॥ ५८ ॥

तस्मान्मोहं परित्यज्य पूज्यौ सज्जं व्रताय माम् । सर्वथैवानुमन्येथामिहार्थेऽस्मि कृताञ्जलिः ॥ ५९ ॥

अन्वयः–तस्मात् (हे) पूज्यौ ! मोहं परित्यज्य, व्रताय सज्जं मां सर्वथा एव अनुमन्येथां ? इह अर्थे कृत अंजलिः अस्मि.

अर्थः—माटे हे पूज्यो ! मोह तजीने, दीक्षामाटे तैयार थयेला, एवा मने सर्वथा प्रकारे आप रजा आपो ? ते माटे हुं ( आपनीपासे) हाथ जोडी (विनंति करुं छुं.) ॥ ५९ ॥

इति श्रुत्वा गलत्सत्त्वा त्रपां त्यक्त्वा जया रयात् । तथारोदीद्यथा लोकांश्चित्रस्थानप्यरोदयत् ॥ ६० ॥

अन्वयः–इति श्रुत्वा गलत्सत्त्वा जया त्रपां त्यक्त्वा रयात् तथा अरोदीत् यथा चित्रस्थान् लोकान् अपि अरोदयत्. ॥ ६० ॥

अर्थः—एम सांभळीने हिम्मतरहित थयेली जयामाता लज्जा छोडीने एकदम एवीरीते रडवा लागी के, जेथी तेणीए चित्रोमां रहेलां मनुष्योने पण रडाव्यां. ॥ ६० ॥

**उत्सङ्गसङ्गिनं कृत्वा स्पृशन्ती पाणिना प्रभुम् । बभाषे बाष्पसंरुद्धकण्ठा कुण्ठगिरा जया ॥ ६१ ॥**

अन्वयः–बाष्प संरुद्ध कंठा जया प्रभुं उत्संग संगिनं कृत्वा, पाणिना स्पृशंती कुंठ गिरा बभाषे. ॥ ६१ ॥

अर्थः–आंसुओथी रुंधाइ गयेला कंठवाळी जयामाता प्रभुने खोळामां बेसाडी, हाथवडे स्पर्श करती थकी अचकातां वचनथी कहेवा लागी के, ॥ ६१ ॥

**हा वत्स मयि वात्सल्यं तत्ते क्व नु गतं क्षणात् । यत्त्वं मे दारयस्येवं हृदयं व्रतवार्तया ॥ ६२ ॥**

अन्वयः—हा वत्स! मयि तत् ते वात्सल्यं क्षणात् नु क्व गतं? यत् त्वं एवं व्रत वार्तया मे हृदयं दारयसि. ॥ ६२ ॥

अर्थः–अरे पुत्र! माराप्रत्येनुं ते तारुं वत्सलपणुं क्षणवारमां क्यां चाल्युं गयुं? के जेथी तुं आवीरीते दीक्षानी वातथी मारुं हृदय चीरी नाखे छे. ॥ ६२ ॥

**मालतीमुकुले युक्तं किं कुकूलाग्निमोचनम् । योग्यं वा नलिनीनाले क्वचित्क्रकचदारणम् ॥ ६३ ॥**

अन्वयः—मालती मुकुले कुकूल अग्नि मोचनं किं युक्तं? वा क्वचित् नलिनी नाले क्रकच दारणं योग्यं ? ॥ ६३ ॥

अर्थः—मालतीना डोडापर शुं धगधगतो अग्नि मूकवो लायक छे? अथवा कमलनी नालने शुं क्यांयें करवतथी वेरवुं योग्य छे.?

**वरं क्षौमाम्बरे किं स्यात्कर्करोत्करबन्धनम् । उच्चैर्मरिचचूर्णस्योचितः क्षेपः किमीक्षणे ॥ ६४ ॥**

अन्वयः—क्षौम अंबरे कर्कर उत्कर बंधनं किं वरं स्यात्? ईक्षणे उच्चैः मरिच चूर्णस्य क्षेपः किं उचितः? ॥ ६४ ॥

अर्थः—बारीक रेशमी वस्त्रमां शुं कांकराओनो समूह बांधवो सारो लागे? अथवा आंखमां शुं अत्यंत मरचांनुं चूर्ण नाखवुं लायक कहेवाय? ॥ ६४ ॥

**काचकुम्भे किमु श्रेष्ठं हठान्मुद्गरताडनम् । किं रम्भास्तम्भगर्भेऽसिघातपातः सतां मतः ॥ ६५ ॥**

अन्वयः—काच कुंभे किमु हठात् मुद्गर ताडनं श्रेष्ठं? रंभा स्तंभ गर्भे किं असि घात पातः सतां मतः? ॥ ६५ ॥

अर्थः—काचना कलशपर शुं जोरथी मुद्गर मारवो लायक छे? अथवा केळना स्तंभना गर्भपर शुं तलवारनो घा मारवो सज्जनोने माननीक छे? ॥ ६५ ॥

**अस्मिञ्शिरीषपुष्पाग्रसुकुमारे कुमार किम् । केशोन्मूलनमुख्यानि कष्टानीष्टानि तेऽङ्गके ॥ ६६ ॥**

अन्वयः—हे कुमार! शिरीष पुष्प अग्र सुकुमारे अस्मिन् ते अंगके केश उन्मूलन मुख्यानि कष्टानि किं इष्टानि? ॥ ६६ ॥

अर्थः—वळी हे कुमार! सरसवना पुष्पना अग्रभागसरखा आ तारां (सुकुमाल) अंगमाटे केशोना लोचआदिक कष्टो शुं सहन थइ शके तेवां छे? ॥ ६६ ॥ चतुर्भिः कलापकं ॥

**अथाहार्हन्सुधासारं विश्वतापहरं वचः । अहृद्यैः खिद्यसे मातः किमेभिः कुविकल्पनैः ॥ ६७ ॥**

अन्वयः-अथ अर्हन् सुधा सारं विश्व ताप हरं वचः आह, (हे) मातः! अहृद्यैः एभिः कुविकल्पैः किं खिद्यसे? ॥ ६७ ॥

अर्थः—पछी प्रभु अमृतसरखुं मनोहर, तथा जगतना तापने हरनारुं वचन बोल्या के, हे माताजी! सारविनाना आवा खोटा विकल्पोवडे तमो शामाटे खेद पामो छो? ॥ ६७ ॥

**सौकुमार्यं बहिःस्पर्शे सारत्वं चान्तरं स्थिरम् । अर्हतां जायतेऽङ्गेषु वज्रेष्विव जनोत्तरम् ॥ ६८ ॥**

अन्वयः-अर्हतां अंगेषु वज्रेषु इव बहिः स्पर्शे जनोत्तरं सौकुमार्यं, च आंतरं सारत्वं स्थिरं जायते. ॥ ६८ ॥

अर्थः—तीर्थकरोनां अंगोमां वज्रोनीपेठे बाह्य स्पर्शमां लोकोत्तर सुकुमालपणुं, तथा अंतरंग पराक्रम तो स्थिरतावाळुं होय छे,

**इति श्रुत्वा व्रतार्थित्वे मत्वा नाथस्य निश्चयम् । जगाद भगवत्पूज्यां वसुपूज्यनृपो जयाम् ॥ ६९ ॥**

अन्वयः-इति श्रुत्वा, नाथस्य व्रत अर्थित्वे निश्चयं मत्वा वसुपूज्य नृपः भगवत् पूज्यां जयां जगाद. ॥ ६९ ॥

अर्थः-एम सांभळीने प्रभुनो दीक्षा लेवामां निश्चय जाणीने वसुपूज्य राजा, प्रभुने पूजनीक एवी पण ते जयाराणीने कहेवा लाग्या के, ॥ ६९ ॥

**धन्यां मन्यामहे देवि त्वामेव भुवनत्रये । सुरासुरनरेन्द्रार्च्यः सूनुर्यस्या जिनोऽजनि ॥ ७० ॥**

अन्वयः-(हे) देवि! त्वां एव भुवन त्रये धन्यां मन्यामहे, यस्याः सूनुः सुर नर इंद्र अर्च्यः जिनः अजनि. ॥ ७० ॥

अर्थः–हे देवि! (अमा ता) [illegible]

पूजनीक एवा जिनेश्वर प्रभु थया छे. ॥ ७० ॥

**ततः स्वकीयपुण्यैकप्रासादस्याधुनाद्भुतम् । अर्हद्दीक्षानुमत्या त्वं कलशारोपणं कुरु ॥ ७१ ॥**

अन्वयः–ततः अधुना स्वकीय पुण्य एक प्रासादस्य अर्हत् दीक्षा अनुमत्या त्वं अद्भुतं कलश आरोपणं कुरु? ॥ ७१ ॥

अर्थः–माटे हवे पोतानां पुण्यरूपीज एक मेहेलपर प्रभुनी दीक्षानी अनुमतिथी तमो आश्चर्यकारक कलशारोपण करो? ॥ ७१ ॥

**एवमुक्तावदन्मुक्ताकान्तिकान्तान्वया जया । मत्पुत्रस्य भवत्विष्टं हृष्टास्म्येतावताप्यहम् ॥ ७२ ॥**

अन्वयः—एवं उक्ता मुक्ता कांति कांत अन्वया जया अवदत्, मत्पुत्रस्य इष्टं भवतु? एतावता अपि अहं हृष्टा अस्मि. ॥७२॥

अर्थः–एम कहेवाथी मोतीनी कांतिसरखा निर्मल कुलवाळी ते जयामाता कहेवा लागी के, भले मारा पुत्रनी इच्छामुजब थाओ? आटलेथी पण हुं खुशी छुं. ॥ ७२ ॥

**ततः कृताञ्जलिः स्वामी तावापृच्छ्य प्रमोदतः । सांवत्सरिकमारेभे दानं सर्वार्हतां मतम् ॥ ७३ ॥**

अन्वयः–ततः कृत अंजलिः स्वामी तौ आपृच्छ्य प्रमोदतः सर्व अर्हतां मतं सांवत्सरिकं दानं आरेभे. ॥ ७३ ॥

अर्थः–पछी हाथ जोडीने प्रभु तेमनी रजा लेइने हर्षथी सर्व तीर्थकरोए स्वीकारेलुं सांवत्सरिक दान देवा लाग्या. ॥ ७३ ॥

**आसमुद्रममुद्रं तद्दानं दातुमिलातले । जिनो जङ्गमकल्पद्रूश्चकार क न किंकरान् ॥ ७४ ॥**

अन्वयः—जिनः आसमुद्रं इलातले तत् अमुद्रं दानं दातुं किंकरान् क्व जंगम कल्पद्रून् चकार ? ॥ ७४ ॥

अर्थः—ते जिनेश्वरप्रभुए छेक समुद्रसुधी पृथ्वीपीठपर ते संकोचरहित दान देवामाटे (पोताना) नोकरोने क्यां क्यां जंगम कल्पवृक्षसरखा न कर्या ? ॥ ७४ ॥

**यस्मै यद्रोचते तेन तद् ग्राह्यमिति गर्जिनः । जातरूपाम्बुदाः स्वामिमन्त्रिणो ववृषुर्भुवि ॥ ७५ ॥**

अन्वयः—यस्मै यद् रोचते, तेन तद् ग्राह्यं, इति गर्जिनः जातरूप अंबुदाः स्वामि मंत्रिणः भुवि ववृषुः. ॥ ७५ ॥

अर्थः—जेने जे कंई रुचे, तेणे ते लेवुं, एम उद्घोषणा करता अने सुवर्णना मेघसरखा प्रभुना मंत्रिओ पृथ्वीपर ( दाननो ) वरसाद वरसवा लाग्या. ॥ ७५ ॥

**क्षीणस्वामीनि नष्टानि प्रभ्रष्टानि चिरादपि क्षेत्रश्मशानवेश्मादिक्षितिखातगतान्यपि ॥ ७६ ॥**

**पुञ्जितान्यद्रिकुञ्जेषु यत्र तत्र स्थितानि वा । अतिप्रलीनसेतूनि च्युतकेतूनि सर्वथा ॥ ७७ ॥**

**शक्रादिष्टधनाधीशनियुक्ता जृम्भकामराः । सुवर्णरत्नवित्तानि दाने भर्तुरपूरयन् ॥ ७८ ॥**

अन्वयः—क्षीण स्वामीनि, नष्टानि, प्रभ्रष्टानि, चिरात् अपि क्षेत्र श्मशान वेश्म आदि क्षिति खात गतानि अपि, ॥ ७६ ॥ अद्रिकुंजेषु पुंजितानि, वा यत्र तत्र स्थितानि, अति प्रलीन सेतूनि, सर्वथा च्युत केतूनि, ॥ ७७ ॥ सुवर्ण रत्न वित्तानि शक्र आदिष्ट धनाधीश नियुक्ताः जृंभक अमराः भर्तुः दाने अपूरयन्. ॥ ७८ ॥ त्रिभिर्विशेषकं ॥

अर्थः-नाश पाम्या छे मालिको जेना, खोवाइ गयेलां, पडी गयेलां, घणा समयथी खेतर, श्मशान, तथा घरआदिकनी भूमिमां दटाइ रहेलां, ॥ ७६ ॥ पर्वतोनी कुंजोमां एकठां थयेलां, अथवा ज्यां त्यां पडेलां, अति नष्ट थयेली पाजोवाळां, सर्वथा नष्ट थयेली निशानीवाळां, ॥ ७७ ॥ एवां सुवर्ण, रत्नो तथा द्रव्यो, इन्द्रे हुकम करेला कुबेरना नोकरोरूप जृंभक देवोए प्रभुने ते सांवत्सरीक दानमाटे पूरां कर्यां. ॥ ७८ ॥ त्रिभिर्विशेषकं ॥

**साष्टलक्षां प्रभुः स्वर्णकोटीमेकां दिने दिने । ददावाभोजनारम्भमारभ्य दिवसोदयात् ॥ ७९ ॥**

अन्वयः-प्रभुः दिवस उदयात् आरभ्य आभोजन आरंभं स अष्ट लक्षां एकां स्वर्ग कोटिं दिने दिने ददौ. ॥ ७९ ॥

अर्थः-(एरीते) प्रभु दिवसना उगवाथी मांडीने छेक भोजनवखतसुधीमां एक क्रोड आठ लाख सोनामोहोरो हमेशां आपता हता.

**इत्यष्टाशीतिकोटीभिर्युतं कोटीशतत्रयम् । लक्षाशीतिं च वर्षेण स्वामी चामीकरं ददौ ॥ ८० ॥**

अन्वयः-इति स्वामी अष्टाशीति कोटीभिः युतं कोटी शत त्रयं, च लक्ष अशीतिं चामीकरं वर्षेण ददौ. ॥ ८० ॥

अर्थः—एरीते प्रभुए त्रणसो अठ्यासी क्रोड एंसीलाख सोनामोहोरोनुं दान एक वर्षमां आप्युं. ॥ ८० ॥

**उत्सवेनोत्सुकतमाः समागत्य प्रतेनिरे । तद्दानान्ते विभोर्दीक्षाभिषेकममरेश्वराः ॥ ८१ ॥**

अन्वयः-तद्दान,अंते अमर ईश्वराः उत्सुकतमाः समागत्य उत्सवेन विभोः दीक्षा अभिषेकं प्रतेनिरे. ॥ ८१ ॥

अर्थः—पछी ते वरसीदानने अंते इन्द्रोए अति उत्सुकतापूर्वक त्यां आवीने महोत्सवथी प्रभुनो दीक्षाभिषेक कर्यो. ॥ ८१ ॥

अम्भोभिरभ्यषिञ्चन्त सर्वतीर्थाहृतैः प्रभुम् । चित्रं पवित्रयामासुरात्मानं वृत्रशत्रवः ॥ ८२ ॥

अन्वयः-वृत्र शत्रवः सर्व तीर्थ आहृतैः अंभोभिः प्रभुं अभ्यषिंचंत, चित्रं आत्मानं पवित्रया मासुः ॥ ८२ ॥

अर्थ.—इन्द्रोए सर्व तीर्थोमांथी मगावेलां जलवडे प्रभुनो अभिषेक कर्यो, परंतु आश्चर्यनी वात छे के, ( तेओए ) पोताना आत्माने पवित्र कर्यो. ॥ ८२ ॥

आनीतानि मनोभक्तिभासुराणि बलारिणा । पर्यधत्त प्रभुर्दिव्यवस्त्रालंकरणान्यथ ॥ ८३ ॥

अन्वयः—अथ बलारिणा आनीतानि मनः भक्ति भासुराणि दिव्य वस्त्र अलंकरणानि प्रभुः पर्यधत्त. ॥ ८३ ॥

अर्थः—पछी इन्द्रे लावेलां, अने हृदयनी भक्तिसरखां तेजस्वी दिव्य वस्त्रो तथा आभूषणो प्रभुए पेहेर्यां. ॥ ८३ ॥

तदैव पृथिवीं नाम धामधूतरविच्छविम् । माणिक्यशिबिकां चक्रे शक्रः स्फुरदुपक्रमः ॥ ८४ ॥

अन्वयः-तदा एव स्फुरत् उपक्रमः शक्रः धाम धूत रवि च्छविं माणिक्य शिबिकां पृथिवीं नाम चक्रे. ॥ ८४ ॥

अर्थः—तेज समये स्फुरायमान उद्यमवाळा इन्द्रे तेजथी सूर्यनी छबीनो पण तिरस्कार करनारी माणिक्योनी पृथ्वीनामनी पालखी तैयार करी. ॥ ८४ ॥

अनन्यद्युतिहृद्यायामथ त्रिजगतोपतिः । भवाम्भोधितटस्थल्यामिव तस्यां ददौ पदम् ॥ ८५ ॥

अन्वयः-अथ त्रिजगती पतिः भव अंभोधि तटस्थल्यां इव, अनन्य द्युति हृद्यायां तस्यां पदं ददौ. ॥ ८५ ॥

अर्थः—पछी त्रणे भुवनोंना स्वामी एवा ते प्रभुए संसारसमुद्रना किनारासरखी, अने अनुपम कांतिथी मनोहर एवी ते शिबिकामां पग मेल्यो. ॥ ८५ ॥

**सिंहासनमथारोहद्विश्वपातकघातकः । विवेकमिव तीर्थेशधर्मः सहजनिर्मलः ॥ ८६ ॥**

अन्वयः—अथ सहज निर्मलः तीर्थेश धर्मः विवेकं इव, विश्व पातक घातकः सिंहासनं आरोहत्. ॥ ८६ ॥

अर्थः—पछी स्वभावथीज निर्मल एवो श्रीतीर्थंकरप्रभुनो धर्म जेम विवेकनुं आलंबन करे, तेम जगतना पापोनो नाश करनारा प्रभु सिंहासनपर चड्या. ॥ ८६ ॥

**अथोत्क्षिप्ता नरैः सारशृङ्गारैः सुकुलोद्भवैः । मुख्यैः सहस्रसंख्यैः सा शिबिका भक्तिभासुरैः ॥ ८७ ॥**

अन्वयः—अथ सार शृंगारैः, सुकुल उद्भवैः, भक्ति भासुरैः सहस्र संख्यैः मुख्यैः नरैः सा शिबिका उत्क्षिप्ता. ॥ ८७ ॥

अर्थः—पछी उत्तम शृंगारवाळा, उत्तम कुलमां उत्पन्न थयेला, अने भक्तिवडे देदीप्यमान एवा हजारो अग्रेसर मनुष्योए ते पालखीने उंचकी. ॥ ८७ ॥

**पूर्वस्मिन्नमरास्तस्यामसुरा दक्षिणे क्षणात् । पश्चिमे गरुडा पार्श्वेऽलगन्नागास्तथोत्तरे ॥ ८८ ॥**

**भम्भादुन्दुभिनिःस्वानभेरीशङ्खपुरःसरम् । वादयद्भिस्तदा कैश्चित्तूर्यं तारतरस्वरम् ॥ ८९ ॥**

जितो जितो भवाभिख्यः शत्रुरद्येति संमदात् । कैश्चित्स्वस्वायुधोल्लासलालसैरग्रयायिभिः ॥ ९० ॥
कैश्चित्करेषु बिभ्रद्भिः शुभ्रां छत्रपरम्पराम् । दर्शयद्भिरिव स्वामिसेवया पुण्यवर्णिकाम् ॥ ९१ ॥
उद्दामचामरमरुत्पूरदूरप्रसर्पणैः । उत्कल्लोलं वितन्वद्भिः कैश्चित्पुण्यपयोऽर्णवम् ॥ ९२ ॥
उत्तालतालवृन्ताग्रजाग्रन्मारुतचारुभिः । प्रतापदीपं मोहस्य लुम्पद्भिरिव कैश्चन ॥ ९३ ॥
कैश्चित्कृष्णालिपातेन विश्वासजननीरिव । कलयद्भिः स्रजः पापव्रजानामिव वागुराः ॥ ९४ ॥
आनन्दामृतगण्डूषनिभस्तवनलीलया । स्तुवद्भिः कैश्चनाप्युच्चैः सुरासुरनरैर्वृतः ॥ ९५ ॥
जीव नन्द जयेत्याशीर्गिरा पौरजनैः स्तुतः । विहारगृहनामानमाराममगमद्विभुः ॥ ९६ ॥

अन्वयः—क्षणात् तस्यां पूर्वस्मिन् अमराः, दक्षिणे असुराः, पश्चिमे गरुडाः, तथा उत्तरे पार्श्वे नागाः अलगन्. ॥ ८८ ॥ तदा भंभा दुंदुभि निःस्वान भेरी शंख पुरस्सरं, तारतर स्वरं तूर्यं वादयद्भिः कैश्चित्, ॥ ८९ ॥ अद्य भव अभिख्यः शत्रुः जितः जितः, इति संमदात् स्वस्व आयुध उल्लास लालसैः अग्र यायिभिः कैश्चित्, ॥ ९० ॥ स्वामि सेवया पुण्य वर्णिकां दर्शयद्भिः इव शुभ्रां छत्र परंपरां बिभ्रद्भिः कैश्चित्, ॥ ९१ ॥ उद्दाम चामर मरुत् पूर दूर प्रसर्पणैः पुण्य पयोऽर्णवं उत्कल्लोलं वितन्वद्भिः कैश्चित्, ॥ ९२ ॥ उत्ताल तालवृंत अग्र जाग्रत् मारुत चारुभिः मोहस्य प्रताप दीपं लुंपद्भिः इव कैश्चन, ॥ ९३ ॥ कृष्ण अलि पातेन विश्वास जननीः

इव, पाप व्रजानां वागुराः इव स्रजः कलयद्भिः कैश्चित्, ॥ ९४ ॥ आनंद अमृत गंडूष निभ स्तवन लीलया उच्चैः स्तुवद्भिः अपि कैश्चन सुर असुर नरैः वृतः, ॥ ९५ ॥ जीव ? नंद ? जय ? इति आशीः गिरा पौर जनैः स्तुतः विभुः विहार गृह नामानं आरामं अगमत्. ॥ ९६ ॥ अष्टभिः कुलकं ॥

अर्थः—पछी क्षणवारमां ते पालखीनी पूर्वतरफ देवो, दक्षिणतरफ दानवो, पश्चिमतरफ गरुडो, तथा उत्तरतरफ नागकुमारो वळगी गया. ॥८८॥ ते वखते भंभा, दुंदुभि, नगारां, भेरी तथा शंखआदिक वाजित्रोने अति जोरथी वगाडता केटलाक, ॥८९॥ आजे संसारनामना शत्रुने जीत्यो छे, जीत्यो छे, एवा हर्षथी पोतपोताना हथीयारो उछाळता, अने आगळ चालता केटलाक, तथा प्रभुनी सेवाथी मळेलां पुण्यनी जाणे वानकी देखाडता होय नही ! तेम श्वेत छत्रोनी श्रेणिने धारण करता एवा केटलाक, ॥९१॥ तथा उछळता चामरोना वायुना समूहना अति फेलावाथी पुण्यरूपी महासागरने उछळतां मोजांओवाळो करता एवा केटलाक, ९२ तथा वींझाता पंखाओना अग्र भागथी उत्पन्न थता पवनना सपाटाथी मोहना प्रतापरूपी दीपकने जाणे बूझावता होय नही ! एवा केटलाक, ॥ ९३ ॥ तथा श्याम भमराओना आवी पडवाथी जाणे विश्वास उपजावती, अने पापोना समूहने पकडवाने जाळसरखी पुष्पमाळाओने धारण करता, एवा केटलाक, ॥ ९४ ॥ अने आनंदरूपी अमृतना कोगळा सरखा स्तवनोनी लीलाथी घणी स्तुति करता, एवा केटलाक देवो, दानवो तथा मनुष्योथी वींटायेला, ॥ ९५ ॥ तथा तमो जीवो ? समृद्धि पामो ? जय पामो ? एवी रीतनां आशीर्वचनोथी नागरिकोवडे स्तुति कराता, एवा प्रभु विहारगृहनामना बगीचामां गया. ॥९६॥ अष्टभिः कुलकं ॥

**प्रभुर्यानादथोत्तीर्य सूर्यः पूर्वाचलादिव । बाल्यरागमिवामोक्तुमारेमे भूषणव्रजम् ॥ ९७ ॥**

अन्वयः- पूर्वाचलात् सूर्यः इव, यानात् अवतीर्य प्रभुः, बाल्य रागं इव भूषण व्रजं आमोक्तुं आरेभे. ॥ ९७ ॥

अर्थः-पछी उदयाचलपरथी सूर्यनीपेठे ते पालखीमांथी उतरीने प्रभु, बाल्यावस्थाना रागनीपेठे आभूषणोना समूहने उतारवा लाग्या.

**नैकाकिनी वराकी मे युक्तं मोक्तुमलंकृतिः । इतीव मुमुचे सेत्थं ससहाया तदार्हता ॥ ९८ ॥**

अन्वयः-वराकी अलंकृतिः मे एकाकिनी मोक्तुं युक्तं न, इति इव अर्हता तदा सा इत्थं ससहाया मुमुचे. ॥ ९८ ॥

अर्थः—बिचारा अलंकारने मारे एकलो मूकवो योग्य नथी, जाणे एवा हेतुथी ते तीर्थंकरप्रभुए ते वखते ते अलंकारने नीचे-मुजब सहायसहित तजी दीधो. ॥ ९८ ॥

**पूर्वं मुमोच मुकुटं छत्रच्छायेच्छया समम् । स्वामी धम्मिल्लपुष्पौघं युतं स्नानमनोरथैः ॥ ९९ ॥**

अन्वयः-पूर्वं स्वामी छत्र च्छाया इच्छया समं मुकुटं मुमोच, स्नान मनोरथैः युतं धम्मिल्ल पुष्प ओघं. ॥ ९९ ॥

अर्थः—प्रथम प्रभुए छत्रनी छायानी इच्छानी साथे मुकुटने तजी दीधो, अने पछी स्नान करवाना मनोरथोनी साथे केशोमां गुंथेला पुष्पोना समूहने तजी दीधो. ॥ ९९ ॥

**तत्याज कुण्डलौ साकं चटुश्रुतिकुतूहलैः । ताम्बूलं च जिनः सद्यः सावद्यवचनान्वितम् ॥ ७०० ॥**

अन्वयः—च जिनः चटु श्रुति कुतूहलैः साकं कुंडलौ तत्याज, सावद्य वचन अन्वितं सद्यः तांबूलं, ॥ ७०० ॥

अर्थः—वळी ते प्रभुए मिष्ट वचनो सांभळवानां कौतुकोसाथे कुंडलोने तजी दीधां, तथा दोषयुक्त वचनो सहित तेमणे तुरत तांबूलनो पण त्याग कर्यो. ॥ ७०० ॥

**हारमुत्तारयामास बन्धुस्नेहवृतं विभुः । अङ्गदौ भुजदर्पेण सहामुञ्चन्मुमुक्षुराट् ॥ १ ॥**

अन्वयः—मुमुक्षुराट् विभुः बंधु स्नेह वृतं हारं उत्तारयामास, भुज दर्पेण सह अंगदौ अमुञ्चत् ॥ १ ॥

अर्थः—मुमुक्षुओना राजा एवा ते प्रभुए बंधुओना स्नेहनी साथे हार उतारी नाख्यो, तथा हाथना अभिमाननी साथे बाजुबंधो छोडी दीधां. ॥ १ ॥

**जिनोऽमुञ्चत्कराकल्पान्सत्रा शस्त्रग्रहादरैः । प्रणतव्यूहमोहेन सार्धं चांघ्रिविभूषणम् ॥ २ ॥**

अन्वयः—जिनः शस्त्र ग्रह आदरैः सत्रा कर आकल्पान् अमुंचत् प्रणत व्यूह मोहेन सार्धं अंघ्रि विभूषणं. ॥ २ ॥

अर्थः—पछी तेमणे शस्त्रो ग्रहण करवाना आदरनी साथे हाथनां आभूषणो तजी दीधां, तथा नमेलाओना समूहना मोहनी साथे पगनां आभूषणो पण तजी दीधां. ॥ २ ॥

**इति भूषणमुक्तोऽपि भगवाञ्शुशुभेऽधिकम् । शोभां हन्त्येव रत्नस्य चन्दनादिविलेपनम् ॥ ३ ॥**

अन्वयः—इति भूषण मुक्तः अपि भगवान् अधिकं शुशुभे, चंदन आदि विलेपनं रत्नस्य शोभां हंति एव. ॥ ३ ॥

अर्थः—एरीते आभूषणरहित थयेला एवा पण भगवान अधिक शोभवा लाग्या, केमके चंदनआदिकनुं विलेपन रत्ननी शोभा-ने हणेज छे. ॥ ३ ॥

**त्यक्तपट्टांशुकोऽप्यर्हन्बभौ स्पष्टवपुः प्रभुः । प्रीणयन्विश्वनेत्राणि मेघमुक्त इवार्यमा ॥ ४ ॥**

अन्वयः—त्यक्त पट्ट अंशुकः स्पष्ट वपुः अपि अर्हन् प्रभुः, मेघमुक्तः अर्यमा इव विश्व नेत्राणि प्रीणयन् बभौ. ॥ ४ ॥

अर्थः–वस्त्रोने तजवाथी स्पष्ट देखातां शरीरवाळा एवा पण ते श्रीअरिहंतप्रभु, बादळांरहित थयेला सूर्यनीपेठे जगतना नेत्रोने आनंदित करताथका शोभवा लाग्या. ॥ ४ ॥

**रहस्यं सुकृतस्येव सूक्ष्मं श्लक्ष्णसितं सरुक् । स्कन्धदेशे विभोर्देवदूष्यं देवपतिर्न्यधात् ॥ ५ ॥**

अन्वयः—सुकृतस्य रहस्यं इव, सूक्ष्मं, श्लक्ष्ण सितं, सरुक् देवदूष्यं विभोः स्कंध देशे देवपतिः न्यधात्. ॥ ५ ॥

अर्थः–पछी पुण्यना सारसरखुं सूक्ष्म, अति श्वेत, अने चळकतुं देवदूष्य वस्त्र प्रभुना खभापर इंद्रे धारण कर्युं ॥ ५ ॥

**जयां च वसुपूज्यं च सप्रश्रयमथ प्रभुः । आपृच्छ्यातुच्छबाष्पोघरुद्धदृष्टिं पट्टूक्तिभिः ॥ ३ ॥**

**फाल्गुने वारुणे धिष्ण्ये पूर्वाह्णेऽथ कुहूतिथौ । स्वामी चतुर्थतपसा षड्भिर्मित्रशतैः सह ॥ ७ ॥**

**मूलादुन्मूलयामास पञ्चभिर्मुष्टिभिः कचान् । विषयक्ष्मारुहां दुःखफलदानामिवाङ्कुरान् ॥ ८ ॥**

अन्वयः–अथ प्रभुः अतुच्छ बाष्प ओघ रुद्ध दृष्टिं जयां च वसुपूज्यं च सप्रश्रयं पटु उक्तिभिः आपृच्छय ॥ ६ ॥ अथ फाल्गुने वारुणे धिष्ण्ये, पूर्वाह्ने कुहू तिथौ, चतुर्थ तपसा षड्भिः मित्रशतैः सह स्वामी, ॥ ७ ॥ दुःख फलदानां विषय क्ष्मारुहां अंकुरान् इव, कचान् पंचभिः मुष्टिभिः मूलात् उन्मूलयामास. ॥ ८ ॥ त्रिभिर्विशेषकं ॥

अर्थः–पछी प्रभुए अति आंसुओना समूहथी रुंधाइ गयेली आंखोवाळा जयामाता तथा वसुपूज्यराजानी नम्रतापूर्वक मिष्ट वचनोथी रजा लेइने, ॥ ६ ॥ अने फागण मासमां वारुण नक्षत्रनो योग थये छते, आगले पोहोरे, अमावास्याने दिवसे, उपवासनो तप करीने, छसो मित्रो सहित स्वामीए दुःखरूपी फलो आपनारां विषयोरूपी वृक्षोना अंकुरासरखा केशोने पांच मुष्ठिओवडे मूलमांथी उखेडी नाख्या. ॥ ८ ॥ त्रिभिर्विशेषकं ॥

**सुधर्मेशः प्रभोः केशजालमालम्ब्य वाससा । चिक्षेप क्षीरजलधौ नीत्वा तीर्थत्वकारणम् ॥ ९ ॥**

अन्वयः–सुधर्मेशः प्रभोः केश जालं वाससा आलंब्य, तीर्थत्व कारणं नीत्वा क्षीर जलधौ चिक्षेप. ॥ ९ ॥

अर्थः–पछी सुधर्मेन्द्रे प्रभुना केशोना समूहने वस्त्रमां लेइने तीर्थपणाना कारणने लीधे क्षीरसमुद्रमां नाख्या, ॥ ९ ॥

**दृग्निमेषोन्मेषसदृक्कृतद्रुमागमरंहसा । शक्रेण प्रतिषिद्धेऽथ तुमुले तनुशालिनाम् ॥ १० ॥**

**योगं समग्रसावद्यं प्रत्याख्यामीति गीतगीः । प्रपेदे चारुचारित्रं कृतसिद्धनमस्कृतिः॥ ११ ॥ युग्मं ॥**

अन्वयः–अथ दृग् निमेष उन्मेष सदृक् तद् गमागम रंहसा शक्रेण तनुशालिनां तुमुले प्रतिषिद्धे, ॥ १० ॥ समग्र सावद्यं योगं प्रत्याख्यामि इति गीतगीः, कृत सिद्ध नमस्कृतिः ( प्रभुः ) चारु चारित्रं प्रपेदे. ॥ ११ ॥ युग्मं ॥

अर्थः–पछी आंख मीचवा उघाडवाजेटला त्यां जवा आववाना वेगवाळा इंद्रे प्राणीओनो कोलाहल निवारते छते, ॥१०॥ सघळा सावद्य योगोनां हुं पच्चख्खाण करुं छुं, एवुं वचन बोलीने, तथा सिद्ध भगवानने नमस्कार करीने प्रभुए मनोहर चारित्र अंगीकार कर्युं. ॥ ११ ॥ युग्मं ॥

**नारकैरपि लेभेऽर्हद्दीक्षणेन क्षणं सुखम् । व्यजनैकभ्रमिभुवा वायुनेव श्रमातुरैः ॥ १२ ॥**

अन्वय—व्यजन एक भ्रमि भुवा वायुना श्रम आतुरैः इव, अर्हत् दीक्षणेन क्षणं नारकैः अपि सुखं लेभे. ॥ १२ ॥

अर्थ–वींझणो हलाववाथी उत्पन्न थयेला वायुवडे जेम थाकेला मनुष्यो सुख पामे छे, तेम प्रभुनी दीक्षाथी क्षणवारसुधी नारकीओए पण सुख प्राप्त कर्युं. ॥ १२ ॥

**ज्ञानं जज्ञे नरक्षेत्रमनोद्रव्यप्रकाशकम् । मनःपर्यायमीशस्य सस्पर्धमिव दीक्षया ॥ १३ ॥**

अन्वयः–दीक्षया सस्पर्धं इव ईशस्य नर क्षेत्र मनः द्रव्य प्रकाशकं मनः पर्यायं ज्ञानं जज्ञे. ॥ १३ ॥

अर्थः–दीक्षानी साथे जाणे स्पर्धा करतुं होय नहीं! तेम प्रभुने (ते वखते) मनुष्यक्षेत्रनी अंदर रहेलां प्राणीओना मनोद्रव्यने प्रकाशनारुं मनपर्यव ज्ञान प्राप्त थयुं. ॥ १३ ॥

रचिताञ्जलयः शक्रादयः सुरवरास्ततः । आनम्य नाथं जगतामिति स्तुतिमतन्वत ॥ १४ ॥

अन्वयः–ततः रचित्त अंजलयः शक्र आदयः सुरवराः जगतां नाथं आनम्य इति स्तुतिं अतन्वत. ॥ १४ ॥

अर्थः–पछी जोडेला छे हाथजे ओए अेवा इंद्र आदिक उत्तम देवो ते जगतना स्वामीने नमीने नीचेमुजब स्तुति करवा लाग्या.

जय लोकत्रयोनाथ जय लोकत्रयीगुरो । जय लोकत्रयीध्येय जय लोकत्रयीप्रिय ॥ १५ ॥

अन्वयः–(हे) लोक त्रयी नाथ! जय? (हे) लोक त्रयी गुरो? जय? (हे) लोक त्रयी ध्येय! जय? (हे) लोक त्रयी प्रिय! जय?

अर्थः—हे! त्रणे लोकोना स्वामी तमो जय पामो? हे! त्रणे लोकोना गुरु! तमो जय पामो? हे! त्रणे लोकोने ध्यान धरवा लायक! तमो जय पामो? हे! त्रणे लोकोना प्रिय! तमो जय पामो? ॥ १५ ॥

पापपङ्कावलीमज्जज्जन्तुजातोध्धृतिक्षमम् । मज्जन्तं कालजम्बाले धर्ममुध्धृतवान्भवान् ॥ १६ ॥

अन्वयः–पाप पंक आवली मज्जत् जंतु जात उध्धृति क्षमं, काल जंबाले मज्जंतं धर्मं भवान् उध्धृतवान्. ॥ १६ ॥

अर्थः–पापो रूपी कादवनी श्रेणिमां डुबता सर्व प्राणीओनो उद्धार करवामां समर्थ, तथा आ (पडता) कालरूपी कादवमां डुबता धर्मनो आप उद्धार करनारा छो. ॥ १६ ॥

स्वामिनामपि यः स्वामी गुरूणामपि यो गुरुः । देवानामपि यो देवस्तस्मै तुभ्यं नमो नमः ॥ १७ ॥

अन्वयः—यः स्वामिनां अपि स्वामी, यः गुरूणां अपि गुरुः, यः देवानां अपि देवः, तस्मै तुभ्यं नमः नमः. ॥ १७ ॥

अर्थः—जे स्वामिओना पण स्वामी छो, जे गुरुओना पण गुरु छो, तथा जे देवोना पण देव छो, एवा ते आपप्रते नमस्कार थाओ ? नमस्कार थाओ ? ॥ १७ ॥

**स्मिताभिर्दृष्टिभिः स्वामिन्प्रसादामृतवृष्टिभिः । ज्वलद्भवदवज्वालादाहिनः पाहि पाहि नः ॥ १८ ॥**

अन्वयः–(हे) स्वामिन् ! प्रसाद अमृतवृष्टिभिः स्मिताभिः दृष्टिभिः ज्वलत् भव दव ज्वाला दाहिनः नः पाहि ? पाहि ? ॥१८॥

अर्थः—हे प्रभु ! कृपारूपी अमृतने वरसनारी, अने हसती एवी आपनी दृष्टिथी, संसाररूपी बळता दावानलनी ज्वालामां बळी रहेला एवा जे अमो, तेओनुं रक्षण करो ? रक्षण करो ? ॥ १८ ॥

**इति स्तुत्वा जगत्पूज्यं वासुपूज्यं सुरोत्तमाः । अम्बातातौ विभोर्लोकान्संबोध्य मुमुचुः पुरे ॥ १९ ॥**

अन्वयः–इति जगत् पूज्यं वासुपूज्यं स्तुत्वा सुर उत्तमाः विभोः अंबा तातौ लोकान् संबोध्य पुरे मुमुचुः. ॥ १९ ॥

अर्थः—एरीते जगतने पूजनीक एवा ते श्रीवासुपूज्य प्रभुनी स्तुति करीने ते इन्द्रोए प्रभुना मातापिताने तथा लोकोने समजावीने नगरमां मूक्या. ॥ १९ ॥

**जन्माभिषेकवत्क्लृप्तनन्दीश्वरवरोत्सवाः । प्रापुर्निजं निजं धाम तेऽथ स्वर्धामशेखराः ॥ २० ॥**

अन्वयः–अथ ते स्वर्धाम शेखराः जन्म अभिषेकवत् क्लृप्त नंदीश्वर वर उत्सवाः निजं निजं धाम प्रापुः. ॥ २० ॥

अर्थः–पछी ते इन्द्रो जन्माभिषेकनीपेठे नंदीश्वर द्वीपमां उत्तम महोत्सवो करीने पोतपोताने स्थानके गया. ॥ २० ॥

**वर्त्मना दृष्टिपूतेनापरेऽह्नि परमेश्वरः । पुरं महापुरं नाम पारणाय प्रयातवान् ॥ २१ ॥**

अन्वयः—अपरे अह्नि परमेश्वरः दृष्टि पूतेन वर्त्मना पारणाय महापुरं नाम पुरं प्रयातवान्. ॥ २१ ॥

अर्थः—पछी बीजे दिवसे प्रभु दृष्टिथी पवित्र थयेला मार्गवडे पारणुं करवामाटे महापुरनामना नगरमां पधार्या. ॥ २१ ॥

**निभाल्य प्रभुमायान्तमुद्यन्तमिव भास्करम् । पौरास्तुमुलिनः प्रीत्या समुत्पेतुः खगा इव ॥ २२ ॥**

अन्वयः–उद्यंतं भास्करं इव प्रभुं आयांतं निभाल्य प्रीत्या तुमुलिनः पौराः खगा इव समुत्पेतुः. ॥ २२ ॥

अर्थः–उगता सूर्यनीपेठे प्रभुने आवता जोइने आनंदथी कोलाहल करता नागरिको पक्षीओनीपेठे (त्यां) एकठा थवा लाग्या.

**तद्विभाव्य च सानन्दः सुनन्दो मेदिनीपतिः । मुक्तच्छत्रपदत्राणस्त्वरमाणोऽभ्यगात्प्रभुम् ॥ २३ ॥**

अन्वयः–च तत् विभाव्य स आनंदः सुनंदः मेदिनी पतिः मुक्त च्छत्र पद त्राणः त्वरमाणः प्रभुं अभ्यगात्. ॥ २३ ॥

अर्थः—पछी ते वृत्तांत जाणीने हर्षित थयेलो सुनंदनामनो राजा छत्र तथा पगरखां तजीने उतावळथी प्रभु पासे आव्यो. ॥२३॥

**सुकृती सुकृताम्भोधिस्नातः प्रभुनिभालनात् । केशान्सुरभयामास प्रभुपादाब्जमार्जनैः ॥ २४ ॥**

अन्वयः–सुकृती, सुकृत प्रभुनिभालनात् अंभोधि स्नातः (सः) प्रभु पाद अब्ज मार्जनैः केशान् सुरभयामास. ॥ २४ ॥

अर्थः—पुण्यशाली, तथा प्रभुने जोइने जाणे पुण्यरूपी समुद्रमां न्हायेला ते राजाए तेमना चरणकमलोनुं प्रमार्जन करीने (पोताना) केशोने सुगंधी कर्या. ॥ २४ ॥

**तेनाथ कृतकृत्योऽस्मि धन्योऽस्मीति च वादिना। कारितः परमान्नेन पारणं परमेश्वरः ॥ २५ ॥**

अन्वयः–अथ कृत कृत्यः अस्मि, धन्यः अस्मि, इति च वादिना तेन परम अन्नेन परमेश्वरः पारणं कारितः. ॥ २५ ॥

अर्थः—पछी हुं कृतार्थ थयो छुं, हुं धन्य छुं, एम बोलता एवा ते राजाए दूधपाकथी प्रभुने पारणुं कराव्युं. ॥ २५ ॥

**पाणिभ्यां पायसं स्वामी कलयन्निन्दुनिर्मलम्। अदर्शयत्सुनन्दाय कन्दं पुण्यतरोरिव ॥ २६ ॥**

अन्वयः–इंदु निर्मलं पायसं पाणिभ्यां कलयन् स्वामी, पुण्य तरोः कंदं इव सुनंदाय अदर्शयत्. ॥ २६ ॥

अर्थः—चंद्रसरखो निर्मल दूधपाक बन्ने हाथमां लेता प्रभुए पुण्यरूपी वृक्षनो जाणे कंद ते सुनंदराजाने देखाड्यो. ॥ २६ ॥

**नेदुर्मेदुरसन्नादा दिवि दुन्दुभयस्तदा। सुनन्दामन्दपुण्याब्धिकल्लोलरवचारवः ॥ २७ ॥**

अन्वयः–तदा सुनंद अमंद पुण्य अब्धि कल्लोल रव चारवः मेदुर सन्नादाः दुंदुभयः दिवि नेदुः. ॥ २७ ॥

अर्थः—ते वखते ते सुनंद राजाना अति पुण्यरूपी महासागरना मोजांओना शब्दसरखी मनोहर अवाजवाळी दुंदुभिओ आकाशमां वागवा लागी. ॥ २७ ॥

सुनन्दमन्दिरे रत्नवृष्टिः काप्यभवद्दिवः । तदुत्सवोच्छलत्स्वर्गिभ्रष्टभूषणभूरिव ॥ २८ ॥

अन्वयः—तत् उत्सव उच्छलत् स्वर्गि भ्रष्ट भूषण भूः इव, का अपि रत्न वृष्टिः सुनंद मंदिरे दिवः अभवत्. ॥ २८ ॥

अर्थः—ते महोत्सवमां उल्लासित थयेला देवोनां जाणे खरी गयेलां आभूषणोनी बनेली पृथ्वी होय नही ! एवी कोइक (आश्चर्यकारक) रत्नोनी वृष्टि ते सुनंदराजाना घरमां आकाशमांथी थइ. ॥ २८ ॥

पुष्पवृष्टिरभूद्व्योम्नस्तं दातारं तदाद्भुतम् । अर्चितुं कल्पवृक्षाधिदैवतैरिव कल्पिता ॥ २९ ॥

अन्वयः—तदा तं अद्भुतं दातारं अर्चितुं इव कल्प वृक्ष अधिदैवतैः कल्पिता व्योम्नः पुष्पवृष्टिः अभूत्. ॥ २९ ॥

अर्थः—ते वखते ते अद्भुत दातारने जाणे पूजवामाटे होय नही ! तेम कल्पवृक्षोना अधिष्टायक देवोए वरसावेली आकाशमांथी पुष्पोनी वृष्टि थइ. ॥ २९ ॥

सुनन्दकीर्तिधूतानां सुरद्रुकुसुमस्रजाम् । मकरन्दैरिव दिवो वृष्टिर्गन्धोदकैरभूत् ॥ ३० ॥

अन्वयः—सुनंद कीर्ति धूतानां सुरद्रु कुसुम स्रजां मकरंदैः इव गंधोदकैः दिवः वृष्टिः अभूत्. ॥ ३० ॥

अर्थः—ते सुनंदराजानी कीर्तिथी कंपित थयेलां कल्पवृक्षोना पुष्पोनी मालाओना जाणे मकरंद रसवडे होय नही ! तेम सुगंधी जलवडे आकाशमांथी वृष्टि थइ. ॥ ३० ॥

श्रीसुनन्दयशोवीचीवरचीवरसंचयः । शचीवरमुखैर्देवैरुत्क्षिप्तः खे चलाचलः ॥ ३१ ॥

अन्वयः—श्री सुनंद यशः वीची वर चीवर संचयः, शची वर मुखैः देवैः खे उत्क्षिप्तः चलाचलः. ॥ ३१ ॥

अर्थः—श्रीसुनंदराजाना यशना मोजांओसरखो उत्तम वस्त्रोनो समूह इन्द्रआदिक देवोए आकाशमां उछाळवाथी फरकवा लाग्यो.

इत्युत्सवेन महता मुनिर्विहितपारणः । जगाम काममन्यत्र भुवनत्रयनायकः ॥ ३२ ॥

अन्वयः—इति महता उत्सवेन विहित पारणः, भुवन त्रय नायकः मुनिः कामं अन्यत्र जगाम. ॥ ३२ ॥

अर्थः—ए रीते महान उत्सवथी करेलुं छे पारणुं जेमणे, तथा त्रणे जगतना नायक एवा ते प्रभु स्वेच्छाथी अन्य जगोए विहार करी गया. ॥ ३२ ॥

अमेयमहिमा मर्त्यैर्मैयमुल्लङ्घ्यतामिति । पारणोर्व्यां प्रभोर्भूपो रत्नपीठमकारयत् ॥ ३३ ॥

अन्वयः—अमेय महिमा इयं मर्त्यैः मा उल्लंघ्यतां, इति प्रभोः पारण उर्व्यां भूपः रत्नपीठं अकारयत्. ॥ ३३ ॥

अर्थः—अमाप महिमावाळी आ पृथ्वीनुं मनुष्यो उल्लंघन न करे तो ठीक, एम विचारीने प्रभुना ते पारणानी भूमिपर ते राजाए रत्नोनी पीठिका करावी. ॥ ३३ ॥

ते मित्रमुनयोऽन्यत्र स्वलब्ध्या कृतपारणाः । अनुजग्मुर्विभुं ब्रह्मव्रतं साधुगुणा यथा ॥ ३४ ॥

अन्वयः—ब्रह्मव्रतं यथा साधु गुणाः, (तथा) ते मित्र मुनयः स्व लब्ध्या अन्यत्र कृत पारणाः विभुं अनुजग्मुः. ॥ ३४ ॥

अर्थः—ब्रह्मचर्य व्रतनी पाछळ जेम साधुना गुणो जाय, तेम ते मित्रमुनिओ पोतानी लब्धिथी अन्य जगोए पारणां करीने प्रभुनी पाछळ पाछळ जवा लाग्या. ॥ ३४ ॥

जिनेन्द्रोऽपि जयं कर्तुं कर्मारीणां क्षमाचरः । विजहारासिधारावत्तपस्तीव्रं दधद् भुवि ॥ ३५ ॥

अन्वयः—क्षमा चरः जिनेंद्रः अपि कर्म अरीणां जयं कर्तुं, असि धारावत् तीव्रं तपः दधत् भुवि विजहार. ॥ ३५ ॥

अर्थः—क्षमायुक्त आचारवाळा ( पक्षे पृथ्वीपर विचरनारा ) ते जिनेश्वर प्रभु पण कर्मोरूपी शत्रूओनो जय करवामाटे खड्गनी धारा सरखो आकरो तप करता थका पृथ्वीपर विहार करवा लाग्या. ॥ ३५ ॥

॥ इति श्रीवासुपूज्यचरित्रे पंचमो भागः समाप्तः ॥ श्रीरस्तु ॥ आ ग्रंथ तेना आ भागना अन्वय तथा गुजराती भाषांतर जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे करी स्वपरना हितमाटे पोताना श्रीजैन भास्करोदय छापखानामां छापी प्रसिद्ध कर्योछे. ॥

समाप्तोऽयं पंचमो भागो गुरुश्रीमच्चारित्रविजय सुप्रसादात् ॥

## ॥ अन्वय साथे गुजराती भाषांतरवाळा नवीन छपाता ग्रंथो. ॥

( कागळ नहिं वापरतां कार्ड उपर छापेला )

नीचेना ग्रंथो संस्कृत ज्ञान पंडितनी सहाय विना शीखवामाटे आशीर्वादरुप छे जेनी केटलीक नकलोना ग्राहको अगाउथीज थयेला होवाथी नकलो जुज बालासमां छे.

| | | | |
|---|---|---|---|
| | ( मूळ कर्ता वर्धमानसूरि ) | सुमित्रा चरित्र | ( मूळ कर्ता वर्धमानसूरि ) |
| द्विपृष्टवासुदेव चरित्र | ,, | विक्रम चरित्र | ,, |
| शुद्धमत्यादिचतुष्टय चरित्र | ,, | हंस चरित्र | ,, |
| सूरचंद्र चरित्र | ,, | नागील चरित्र | ,, |
| लक्ष्मीपुंज चरित्र | ,, | सिंह चरित्र | ,, |
| विद्यापति चरित्र | ,, | सुरसेन महासेन चरित्र | ,, |
| धर्म चरित्र | ,, | मित्रानंद चरित्र | ,, |
| केशरि चरित्र | ,, | रोहिणी चरित्र | ,, |

मळवानुं ठेकाणुं—पंडित हीरालाल हंसराज—जामनगर.

॥ इति श्रीवासुपूज्यचरित्रे पंचमो भागः समाप्तः ॥